राष्ट्रिय संस्कृत संस्थानम्
नवदेहली

गङ्गानाथ झा केन्द्रीय संस्कृत विद्यापीठ ग्रन्थमाला

॥ १५ ॥

मृद्वीका

नूतनकाव्यमधुपरिपाकः

रचयिता
जगन्नाथ पाठकः

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

Rashtriya Sanskrit Sansthan

(Under the auspices of the Ministry of Education and Culture, Govt. of India)

New Delhi

●

Ganganatha Jha Kendriya Sanskrit Vidyapitha

TEXT SERIES

●

General Editor

Dr. G. C. Tripathi

●

No. 15

MṚDVĪKĀ

(Modern Sanskrit Lyrics)

by

JAGANNATHA PATHAK

ALLAHABAD

1983

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

राष्ट्रियसंस्कृतसंस्थानम्
(केन्द्रीयशिक्षामन्त्रालयस्याङ्गभूतम्)
नवदेहली

—•—

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठग्रन्थमाला
प्रधानसम्पादकः
डॉ० गयाचरण त्रिपाठी

—•—

पञ्चदशं प्रसूनम्

मृद्वीका

नूतनकाव्यमधुपरिपाकः

—•—

रचयिता
जगन्नाथ पाठकः

—•—

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्
चन्द्रशेखर आज़ाद पार्क
प्रयागः-२११००२
१९८३

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मृद्वीका

•

रचयिता

जगन्नाथ पाठकः

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्
चन्द्रशेखर आज़ाद पार्क
प्रयाग–२११००२
१९८३

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

प्रकाशकः
डा० गयाचरण त्रिपाठी
प्राचार्यः
गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्
चन्द्रशेखर आज़ाद पार्क
इलाहाबाद–२११००२

●

पुनर्मुद्रणादिकाः सर्वेऽधिकारा राष्ट्रियसंस्कृतसंस्थानेन स्वायत्तीकृताः

●

मूल्यम्

●

मुद्रकः
शाकुन्तल मुद्रणालयः
३४, बलरामपुर हाउस
इलाहाबाद-२

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

FOREWORD

With immense pleasure and deep satisfaction, we present before the lovers of Sanskrit Poetry the second *Muktaka Kāvya* of the poet Pandit Jagannatha Pathak of this Institute. This may be deemed as a continuation in style and the theme of his *'Kāpiśāyāni'* which has been distinguished by the award of the Sahitya Academy for the year 1981 and has been acclaimed as the best literary production in Sanskrit of this year by the scholars.

The *Mridvīkā* is as soft, as sweet and as delicious as its very name denotes. It has the softness and delicacy of Persian poetry and the sweetness and delight of Sanskrit. Whereas it derives its imagery and symbols from the Persian Literature, the philosophy that it preaches and the feelings that it expresses are essentially Indian in nature.

The *Mridvīkā* is not an euology of wine-cult or Bacchanalian rites. Anybody going through even a

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

couple of verses shall immediately discern that the cup, the wine, the wine-maid and the wine-house are purely abstract symbols for Dr. Pathak who gives vent to the feelings and emotions of his heart, to his failures and disappointments, to his personal accomplishments and spiritual elevations through these archetypes. His poetry, thus is a delicious blend of the beauty of Persian imagery combined with the sweetness of Sanskrit language and Indian feelings. The language of the Kavya is so simple that the reader immediately reaches to the depth of an expression or a statement without being obstructed by the grammar or the vocabulary. It looks sometimes indeed amazing how such subtle thoughts and subtle feelings can be expressed by means of such simple words in such a lucid manner. I hope that the lovers of Sanskrit poetry shall welcome the publication of this Kavya which treads on a novel ground and which has a distinct and original character.

I must record here my deep sense of gratitude to Prof. Vidyaniwas Mishra, Director, K. M. Munshi Institute of Hindi and Linguistics, Agra Universlty, the well-known literary figure of Hindi and a renowned thinker and scholar, who has enha-

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

nced the value and prestige of this literary creation of Dr. Pathak through his introductary remarks. Inspite of his name and fame in the field of Hindi Literature and Linguistics, the first love of Prof. Vidyaniwas Mishra is Sanskrit and we feel highly encouraged through what he has to say about a publication of this Vidyapeetha.

G. C. Tripathi

Principal,
G. N. Jha Kendriya Sanskrit
Vidyapeetha, Allahabad.

December 15th, 1983

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

ance the value and prestige of this literary creation of Dr. Pathak through his introductory remarks. Inspite of his name and fame in the field of Hindi Literature and Linguistics, the first love of Prof. Vidyaniwas Mishra is Sanskrit and we feel highly encouraged through what he has to say about a publication of this Vidyapeetha.

G. C. Tripathi

Principal,

G. N. Jha Kendriya Sanskrit

Vidyapeetha, Allahabad.

December 15th, 1983

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

परोचना

मृद्वीका रसिता। वियोगिनीछन्दसि विरचितेयं कृतिर्महते प्रमोदाय। मृद्वीका नाम निखिलस्य मार्दवस्य निखिलस्य निःशेषीकरणभावस्य निखिलस्य चात्मसवनभावस्य ह्युपलक्षणम्। तदनया रचनया समस्ता अमी भावा उद्रेचिताः। पारसीकसाहित्ये द्राक्षासवव्यापारस्य व्याजेनालौकिकार्थोद्भावनाया अस्ति सुदीर्घा परम्परा, परन्तु संस्कृतसाहित्ये पानगोष्ठीनां वर्णनं लौकिकं परिसीमानं नोज्जिहीत इति नूतनं किञ्चिदाविष्करणं मृद्वीकाकारस्य। संस्कृतकाव्यपरम्परायां नवीनोऽयमुन्मेष इति मन्ये संस्कृतभाषा, उषेव पुराणी युवतिः पुरन्धिस्तत एव सम्भवति प्रस्तुतः समाकल्पः।

प्रसन्नगम्भीरेयं काव्यकृतिः सहृदयान् विस्मापयति, यतो हि नाद्यत्वे बहु दृश्यते ईदृक् प्रसाद इयच्चार्थगौरवम्। चित्तद्रुत्यात्मकस्य

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

प्रेमव्यापारस्य वैलक्षण्यं क्षणे क्षणे नवत्वमेव, तत्कविना संचारिवैविध्येनानुभाववैविध्येन वक्रोक्तिवैविध्येन च सुचारु चित्रितम्। पार्थिवस्यास्य व्यापारस्य तीव्रतैव कथममुं प्रेमाणं जीवनस्य चरमां चरितार्थतामानयतीति वैदग्ध्येनात्र न्यदर्शि। अस्खलितोऽयं मादनभावोऽपूर्वानुभूत एवेति मृद्वीकाप्रणेतारं सभाजयाम्याश्वसिमि चानेन ईदृग्भिरेव "बकुलमञ्जरीगलदमन्दमाध्वीझरीधुरीणरसरीतिभिर्भणितिभि"रजस्रं संस्कृतजगत् प्रमोदयिष्यते रसनिर्भरीकरिष्यत इति।

मार्गशीर्ष शु० ११/२०४० विद्यानिवास मिश्रः

मृद्वीका

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

प्रेम्णः सट्टीकायाः सश्रीकायाः स्ववाग्विलसितेन ।
केचन निर्भीकाया मृद्वीकाया रसयितारः ॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मृद्वीका

प्रथमं शतकम्

हृदि भारति कच्छपीं निजां
मम झङ्कारय, कोऽपि हृद्गतः।
किमपि स्वररसेन घूर्णितः
प्रसभं सम्प्रति गातुमिच्छति ॥१॥

शनकैः शनकैर्यथाऽधुना
मधुना मच्चषकः प्रपूरितः।
त्वमिहावतर क्रमात्तथै-
व मदस्तित्वकरिक्तभाजने ॥२॥

मम तावदिदं निवेदनं
बत विग्लापनमेव मद्गिरः।
उपहर्तुमहो मधु क्षणं
नहि यावत् त्वरते स तत्करः ॥३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मदभीप्सितमेकमीदृशं
न मदैकान्तमिमं गृहाण रे ।
जनदृष्टिभिया पृथङ् मया
मधु निर्मक्षिकमेव पीयते ॥४॥

शृणु किञ्च यथा निवेदया-
म्यधुनाऽतीव रहस्यमात्मनः ।
इह तस्य शुचिस्मितादिदं
मम किञ्चिन्मधु नातिरिच्यते ॥५॥

मधुनो ग्रहणेऽथवाऽर्पणे
नहि सन्देह उदीत आवयोः ।
तदपीह जनो बहिर्गतः
कथमस्मत्प्रणये विशङ्कते ॥६॥

चषकस्य पिपासुता ममा-
पि पिपासां समतीत्य तिष्ठति ।
प्रथमं मधु लब्धवानयं
परतः किञ्चिदवाप्तवानहम् ॥७॥

इह कोऽपि समन्वयथो भवे-
दथ सच्छाय इतो भवेद् द्रुमः ।
सह तेन तले च तस्य वा
सकलं जीवनमेव नेष्यते ॥८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

हृदयं मम काचवत्तदा
शतधाऽजायत शंसाकुलम् ।
अमुनैव पथा प्रियो जनोऽ-
वनतास्यो विहसन् यदा गतः ॥९॥

मम तीव्रतरा पिपासुता
द्रवतां तद्धृदयं विनेष्यति ।
स्वयमेव ममाधराग्रतः
समुपस्थास्यति तत्करान्मधु ॥१०॥

जडताञ्च नयेत् सचेतनं
सुमतिं व्यग्रमतिंत्वसानयेत् ।
सगुणं विदधीत दूषितं
तव नश्यत्करुणे तटस्थता ॥११॥

इयमेव तटस्थता तव
प्रदहन्ती समभूत् तदा नु माम् ।
अधुना तु तव प्रसाद इ-
त्यनुभूयातितरां प्रहृष्यते ॥१२॥

प्रणयाभिनयस्य काचना-
परशैली तु तटस्थता तव ।
मुखरं विदधीत मां कथं
तव मौनं क्षणमेवमन्यथा ॥१३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

तव नाम तटस्थता जले
मम घातप्रतिघातपीडनम् ।
तव मौनमहो ममेदृशं
रुदितं कस्य फलस्य साधनम् ॥१४॥

प्रकटस्य पिधानमात्मनः
स्फुटमग्नाविह भस्मसंवृतिः ।
हसिते रुदितापलापनं
नटनाट्यं हि तटस्थता तव ॥१५॥

प्रणयप्रतिमां भिनत्ति या
घटितां निष्करुणप्रहारतः ।
तव भामिनि काऽपि साम्प्रतं
मयि सद्भावभरे तटस्थता ॥१६॥

किमु भीमतरङ्गभङ्गिभि-
र्न तटस्थोऽपि जनः प्रताड्यते ।
इति हन्त विचार्य साम्प्रतं
परिहार्या विषमा तटस्थता ॥१७॥

न च काऽपि विरोधिताऽवयो-
र्न च काऽपि प्रतिकूलवर्तिता ।
तदपि प्रणयावघातिनी
तव रे मद्विषया तटस्थता ॥१८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

तव नाम तटस्थता नु मां
    जलमध्ये विनिमज्जयेदसौ ।
तव केशकलापग्रहो
    मम साहाय्यमिहाचरेन्न चेत् ॥१९॥

निरपेक्षतया तया स्थितं
    ननु यावन्मम सन्निधावपि ।
अवलम्ब्य बलेन तावदा-
    त्मनि धीरत्वमवस्थितं मया ॥२०॥

क्वचिदेव समुन्मिषत्यसौ
    मनसोऽन्तर्भुवि काऽपि चेतना ।
मदिरेति भृशं निपीय तां
    निजमस्तित्वमपि स्मरामि नो ॥२१॥

सुहृदं प्रति तं किमुच्यतां
    हृदनास्थागतमेतदस्ति मे ।
ननु येन बहूपभाषितं
    मम सासूयमणूपकुर्वता ॥२२॥

कुसुमे सहजातिसुन्दरे
    सुरभिर्नाम यथोपजायते ।
मद एष विनाऽपि मादृशां
    मधुपानं हृदये तथोदितः ॥२३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

न मदो मम गर्व एष रे
न ततो विप्रतिपद्यतां जनः।
परिणामसमं ननु ब्रुवे
सुकृपाया मयि तस्य कस्यचित् ॥२४॥

मलयानिल चेत्पथाऽमुना
तव गन्तव्यमरे यदा भवेत्।
अवरुद्ध इतः क्षणं तदा
सदने प्राघुणिको भवेर्मम ॥२५॥

मलयानिल सन्दिशस्यहो
किमिदं सौरभसम्भृतं मम।
मम वर्धयसे स्पृहां नु त-
त्तनुसंस्पर्शमवाप्तवानसि ॥२६॥

उपसर्पति मालयो मरुत्
सुरभिः प्राघुणिकः पुरो यथा।
मधुरं समुपानयन्निव
प्रियसन्देशमुदारभावनः ॥२७॥

अपराध इतीव न स्मरेः
स्खलितं नाम पदे पदे मम।
इयमस्ति चमत्कृतिस्तव
क्षणपीतस्य मधुस्मितस्य रे ॥२८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मम विस्मरणीयतां गतं
तदिदं नाम बहिर्गतं जगत्।
तव कोमलपाणिसङ्गता-
न्मधुपूर्णाच्चषकादिव क्षणम् ॥२९॥

इह कस्यचिदेव मुग्धया
स्मितभापूरितया कयाचन।
विनिवेदितमेवमादराद्
रसनाग्रे हि मधूपतिष्ठति ॥३०॥

सुहृदो निजवज्रमौनिता-
विषये मौनमितो वरं मम।
विमृशन्तु न किञ्चिदन्यथा
व्यथितानामियमेव पद्धतिः ॥३१॥

क्षुधिता पृथिवी पिपासया
गगनं साम्प्रतमस्ति विह्वलम्।
अलमेवमिह प्रतीक्षया
जलदः श्याम इतो न दृश्यते ॥३२॥

नहि भङ्कृतयो न च स्वरा
मम तन्त्र्यः खलु भग्नतां गताः।
निजकस्य पराजयस्य रे
बत कुर्यां कियता प्रकाशनम् ॥३३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

अनुभूतिमुपेतयाऽऽत्मनो
ननु तस्याः शुभया स्फुरत्तया ।
मम जागरिता पिपासुते-
ति कथैषा चषकग्रहस्य मे ॥३४॥

नहि यावदुपैति तत्करा-
च्चषके किञ्चन तावके मधु ।
तव तावदियं पिपासुता
क्रमशस्तीव्रतमात्वमाप्नुयात् ॥३५॥

जनिमेति कियन्नु सुन्दरं
त्वयि सौन्दर्यनिधान ईदृशि ।
प्रतिपद्यत एव मुग्धतां
किमपि त्वादृशि मादृशो जनः ॥३६॥

रुदितान्यवगुण्ठ्य वर्तसे
हसितेनोज्ज्वलवाससा कियत् ।
विधिनाऽप्यमुना विदीर्णतां
स्वजनानां हृदयं नयस्यहो ॥३७॥

यदिदं कथितं मया न तत्
कथनीयं समभूत् कथञ्चन ।
कथितं कथनीयमात्मना
बत नाद्यावधि तत्पुरो मया ॥३८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

तव रूपरहस्यमात्मना
यदधीतं विनिमील्य चक्षुषी।
न दृशा तदवेक्षितं मया
भविता त्वं वद हेतुरत्र कः ॥३९॥

फलमस्य नु यच्च तद् भवे-
न्न च कश्चिच्छृणुयादथापि वा।
त्वयि गोचरतां गते क्षणं
मयि यत् तत् त्वमिदं विजृम्भितम् ॥४०॥

अपि मौनमिदं मम त्वया
किमपि स्वीक्रियतेऽभिप्रेहि रे।
व्यथितस्य विवृद्धये ममा-
लमिदं साम्प्रतमित्युदीर्यते ॥४१॥

त्वदनुग्रहमेव सर्वथा
परिकल्प्यास्मि भृशं मुदन्वितः।
इह दुर्वहमेव मृण्मयं
निजमस्तित्वकमेतदन्यथा ॥४२॥

नहि वेद न वेत्तुमर्हती-
ह नु सामान्यजनो व्यथामिमाम्।
श्रवणाय न हन्त सज्जसे
त्वमतः सम्प्रति मौनितां भजे ॥४३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

गुरुराह मम स्म कर्णयोः
श्रुतमप्येव नहिं श्रुतं मया ।
इह सम्प्रति चेतसि व्यथे
न कथं तद्वचनं श्रुतं मया ॥४४॥

सह संलपनात् त्वयाऽधुना
विरमामीति निरर्थकं वचः ।
इह संलपसि प्रतिक्षणं
हृदि मे नित्यमुपस्थिता यदि ॥४५॥

सकलं मम लक्ष्यतां गतं
तव चातुर्यमथापि सर्वथा ।
त्वयि विश्वसितं न शक्यते
शिथिलीकर्तुमिदं स्वमात्मना ॥४६॥

तव यत् त्वयि यच्च तच्च तत्
सकलं कृत्रिममेव लक्ष्यते ।
तव कृत्रिमता त्वकृत्रिमा
किमिवाश्चर्यमतः परं वद ॥४७॥

वृणुते हि तमेव सा जनं
निजया नाम विलोचनस्रजा ।
नियतं हृदि यस्य सन्ततं
प्रणयो नाम मधूपतिष्ठति ॥४८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

तृषितं मधुने हि कस्यचिद्
भुवने भाग्यवतः प्रजायते।
लभते तु ततोऽपि भाग्यवान्
कतिचित् तस्य पृषन्ति तत्करात् ॥४९॥

तत एव भवेन्मधुप्रपा
निपतेतां यत एव तद्दृशौ।
चषकग्रहपूर्वमीदृशीं
मतिमास्थाय वयं विनिर्गताः ॥५०॥

रुदितं मम सम्मुदे तवे-
त्यभवद् रे विदितं न मे पुरा।
बहुशो हसितस्य साम्प्रतं
प्रतिकूलं फलमद्य लभ्यते ॥५१॥

हसितं तव भाषितं तव
प्रगुणार्धार्धनिरीक्षितं तव।
तव भामिनि किं न किं न मां
विदधातीव रसार्द्रमादरात् ॥५२॥

कथयोदितया पुनः पुनः
किमभूत् सव्यथया तवान्तिकम्।
स्मयसे विनिशम्य यामिह
स्फुटमेतत् तव मय्युपेक्षितम् ॥५३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

स्थिरतां जगतो गतस्य यद्
विषमं मौनमिव प्रतीयते।
तदिदं प्रलयस्य कस्यचित्
किमु सङ्केत इवागमिष्यतः ॥५४॥

नतयस्तव तावदन्ततः
शिरसो भार इमाः परःशताः।
लभसे नहि यावदेकतो-
ऽपि तदीयस्मितमित्युपायनम् ॥५५॥

द्रुतमस्त्यथवा विलम्बितं
मम रे त्वां प्रति यन्निवेदितम्।
तदिदं सदयेन चेतसा
शृणु पश्चात् समयो मिलेन्न वा ॥५६॥

मम दुःखमियं पिपासुता
मम नाम्नापि सुखं पिपासुता।
मितमेव च सारमुच्यते
मम सर्वस्वमियं पिपासुता ॥५७॥

जगतो नहि मे पलायनं
चषकस्य ग्रहणे कथञ्चन।
इह कामपि धर्मतश्च्युतिं
न जनः कोऽपि मम प्रकल्पयेत् ॥५८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

उपगम्य मधुप्रपामिमां
व्यवहारो हि मया सुशिक्षितः।
न ममाचिनयं सुहृज्जनः
कथमप्यत्र कुतोऽपि शङ्कताम् ॥५९॥

तव रूपमिदं हिं मृण्मयं
धनहीनस्य ममेप्सितं परम्।
न हिरण्मयता महाधनै-
रुपनीता तव रे मदीप्सिता ॥६०॥

वितते सरसीह कोऽपि मां
न निमज्जन्तमहो निवारयेत्।
न जनान् हि जनो निमज्जन-
प्रकृतीन् रक्षितुमेवमर्हति ॥६१॥

बहु तथ्यमवेक्षितं मया
मम न स्वप्नसमूहमाहरेः।
इह जागरितेन यन्मया
कलितं तत्सकलं मृषैव रे ॥६२॥

चरणौ गमनार्थमुद्यतौ
मम रथ्यां प्रति तामम् पुनः।
मिलितैर्ननु यत्र कण्टकैः
समभूतां क्षतविक्षतौ पुरा ॥६३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

विनिवेदयसि व्यथां निजां
ननु तस्मै स्वजनाय साम्प्रतम् ।
व्यथितो बत जीवने निजे
क्षणमप्यावधि यो हि नाभवत् ॥६४॥

मधुपानमिदं न मे मृषा
प्रणयो नाभिनयश्च कश्चन ।
न गतानुगतोऽस्मि कस्यचि-
न्मम न स्यादनुगोऽपि कश्चन ॥६५॥

सरलः कुटिलोऽथवा भवे-
न्ननु पन्थाः स मयोररीकृतः ।
इह साऽपि पिपासुतैव मे
मम लाभो मम हानिरस्तु वा ॥६६॥

न सरो न नदीं न चाम्बुधिं
स्वपिपासाप्रशमाय याम्यहम् ।
मधुपानमिहैकमेव तत्
क्षुपिपासां प्रशमं नयेद् यतः ॥६७॥

न घनो घनतां तथा व्यथा-
मुदितः प्रापयदेष मेऽम्बरे ।
तव दृष्टिनिमीलनं तथा
विदधातीव मम व्यथां घनाम् ॥६८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

इयमेव कथाऽस्ति मे यया
सुबहूनां भवतीह रञ्जनम् ।
कतिचित्तु निशम्य तां हृदि
व्यथिता मौनमहो रुदन्त्यमी ॥६९॥

सति हन्त निमीलितेक्षणे
त्वयि सर्वं तमसाऽऽकुलं जगत् ।
ननु सूचयतीदमङ्ग ते
क्षणमुन्मीलनमेव चक्षुषोः ॥७०॥

अहमित्यहमित्युदग्रतां
सकलो व्यञ्जयति स्वचेष्टया ।
प्रियया सह दृष्टिमेलने
प्रभवो द्वित्रजनाश्च पक्ष्मपाः ॥७१॥

कलहः सहजः परस्परं
मधुकुम्भे समुपस्थिते सति ।
प्रथमं मधु मह्यमित्यलं
समुदीते रव एष पायिनाम् ॥७२॥

स्मितमेव तदीयमादरा-
न्मधु मन्ये मधु मे न तन्मधु ।
किमु तद्विषयेऽभिधीयतां
स्मयमाना मधु वर्षतीव सा ॥७३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

न समानतया जनो मम
व्यथितं स्वव्यथितेन योजयेत् ।
मधु विस्मृतये स चेष्टते
मधु पीत्वा तु प्रवर्धयामि तत् ॥७४॥

वचनीयमिदं न जायतां
मधुपानं मम यत्र कुत्रचित् ।
अतिमात्ररहस्यमित्यदः
क्षणमेकान्त इतो हि साध्यते ॥७५॥

न मया नगरे स्थितेन वा
नगराद् वाऽपि बहिर्गते क्षतिः ।
निकटे निकटत्वलाभत-
स्तव रे वञ्चितकं कियत् सहे ॥७६॥

किरणाय नमो विदध्महे
कालिकां यो विनिनाय पुष्पिताम् ।
भुवि सारयते च सौरभं
ननु तस्मै प्रणतिर्नभस्वते ॥७७॥

अवरुन्धि न मां मधुप्रपां
प्रति गच्छन्तमितः क्षणं सखे ।
हृदयात् तृषितस्य मेऽन्यथा
किमपि त्वां प्रति निःसरेद् वृथा ॥७८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

कुरु न प्रतिबद्धमद्य मां
विततं मह्यमुपाहराम्बरम् ।
क्षणमुड्डयनाय साम्प्रतं
मम रे जागरिता पुनः स्पृहा ॥७९॥

मम चेतसि कश्चिदस्फुटो
ननु जागर्ति शुभः प्रतिध्वनिः ।
चलिता क्वणदङ्घ्रिनूपुरा
निजगेहान्मधुकुम्भवाहिनी ॥८०॥

हसितं क्वचिदत्र सर्वथा
रुदितं वा क्वचिदत्र लक्ष्यते ।
सकलं तदधीनमेव मे
मधु सा मह्यमुपाहरेन्न वा ॥८१॥

सकलं मधु मह्यमर्पये-
दिति सर्वोऽभिलषत्युपागतः ।
स्पृहणीयतरा न पायिना-
मिति रे स्वार्थपरायणा मतिः ॥८२॥

मधुपानगृहस्य भित्तयो
मम बाधां जनयन्ति साम्प्रतम् ।
प्रतिबन्ध इतो न सह्यते
ह्यवरोधा निपतन्तु सर्वतः ॥८३॥

—२—

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मधु नाम निमित्तमावयो-
र्व्यवहारस्य, न चेदिहान्यथा।
जनयिष्यति मामकी तृषा
मधु रे त्वन्मधु तत्र तिष्ठतु ॥८४॥

तव गोपनरीतिरीदृशी
प्रणयस्यास्य तथा परीक्षिता।
स्वजनेषु हसत्सु मथ्यहो
स्थितमत्यन्तगभीरया त्वया ॥८५॥

चषकः परिपूर्य दीयते
मम कस्मैचिदिह त्वदग्रतः ।
तृषिते मयि तिष्ठति स्वयं
दयनीयं मम भावय स्थितम् ॥८६॥

खर आतप एव चन्द्रिकाऽ-
प्यथवा जीवनमेतदस्तु मे।
रुदता हसता यथा तथा
दृढमङ्गीकृतमेवमात्मना ॥८७॥

बहुधा रुदितस्य गोपनं
स्मितमित्याहुरमी कलाविदः।
क्रियतां बत किन्तु यन्मया
स्मितनाम्नीह कलैव विस्मृता ॥८८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

न हठो न च कश्चिदाग्रहो
मधुपानाय तथापि जाग्रती ।
स्वतृषा विनिवार्यतां कथं
बहुदूरे म्रियसे शुचिस्मिते ॥८९॥

मधुनः प्रसृते मदे सति
म्रियते न स्वपराख्यभावना ।
वसुधैव कुटुम्बकं तदा
भवति प्रीतिपरस्य पायिनः ॥९०॥

न बधान दवीयसि स्थले
मम गन्तव्यमितो धरातले ।
यदहं पथिको नु तस्य रे
प्रशमं यान्त्ययनान्यलं यतः ॥९१॥

रुदितं हसितं कियत् कियत्
सकलं व्यर्थमिदं ममाभवत् ।
नहि मह्यमहो पिपासवे
मधुदानार्थमुपेतवत्यसौ ॥९२॥

परिवर्तनमेव सर्वथा
जगतः कोऽपि निसर्ग उच्यते ।
अपि मद्विषया निषेधम-
स्यथ तद्वृत्तिरिहास्ति मे मता ॥९३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

तव रूपकणो मयोषसि
स्फुरति क्वापि न लक्षितो दिवि ।
क्व समग्रतया स्फुरस्यहो
ननु तत्स्थानमुपेत्य निर्दिश ॥६४॥

पदचिह्नमहं गवेषयन्
सकलायां दिशि पर्यटामि ते ।
अधुनैव मया श्रुतं कुतो-
ऽपि मदन्वेषणनिर्गताऽसि रे ॥६५॥

मयि यत्नशतैरपि प्रिये
तव नैकस्यसुखेन वञ्चिते ।
करुणार्द्र इवैष तीव्रतां
विरहोऽमुञ्चदहो निजां किमु ॥६६॥

मधुना मिलितेन याप्यतां
म्रियतां हन्त पिपासयाऽथवा ।
उभयत्र कृपाकठोर हे
तव जागर्ति कृपैव कोमला ॥६७॥

कुसुमप्रकरोऽस्मि पादयो-
स्तव निक्षिप्त इहैष पश्य माम् ।
विनिवारयिता जनः क्षणाद्
गतमन्यत्र तु यातयामताम् ॥६८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

इह तिष्ठ ततो न तिष्ठ के-
यमिति त्वन्मधुवेश्मनि स्थितिः ।
वद धार्मिकमन्दिरादहो
कियदेवान्तरमेवमूह्यताम् ॥९९॥

हृदये मम काऽपि साम्प्रतं
मधुशालेव समुल्लसत्यसौ ।
क्व बहिर्जगतीह सा पुन-
र्मधुलाभाय मया गवेष्यताम् ॥१००॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

द्वितीयं शतकम्

नहि वेत्तुमशक्नुवं किम-
ग्यहमद्यावधि तन्मधुस्मितम् ।
हृदि यद् विनिखातशल्यवद्
बहु दुःखाकुरुते विनिःसरन् ॥१०१॥

अयि मां क्षणमुत्सुकं व्यधा-
स्त्र घनश्याम उदञ्चितोऽम्बरे ।
बत तन्मिलनाशया तया
मयि दग्धे किमु दग्धतां गतम् ॥१०२॥

हसितं विकसत्सु पङ्कजे-
ष्वधिसंस्थाप्य स दूरगोऽभवत् ।
रुदितं विनिधाय तेष्वहो
विनिमीलत्सु मयेह याप्यते ॥१०३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

रहिते स्वजनैर्धरातले
क्व पुनर्यामि कुतः पुनः शये ।
मृगतृष्णिकयाऽथवा पुन-
र्मरुभूमाविह पर्यटन् म्रिये ॥१०४॥

क्षणमप्यतितीव्रतां गता
न पिपासा विरमत्यसौ मयि ।
मधुनो जगतीह दुर्लभात्
कियदात्मा विनिवार्यतां मया ॥१०५॥

मधुना तव वञ्चितान् जनान्
ननु मन्ये विफलान् विशेषतः ।
विफला इह ते ततोऽधिकं
मधु तृप्ताः परिपीय तेऽथवा ॥१०६॥

हसितं रुदितत्वमाप्नुयाद्
हसतैवं सुहृदो न सर्वथा ।
हसितत्वमुपेतमात्मनो
रुदितं तु व्यथयत्यतीव माम् ॥१०७॥

सरितो विकलत्वमीदृशं
ननु यान्त्या निकटे पयोनिधेः ।
हृदि मे जनितेन किञ्चिदं
विकलत्वेन समत्वमाप्नुयात् ॥१०८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

कठिने प्रविकीर्णकण्टके
पथि सन्नद्धघनेऽन्धकारिते ।
गमनं विवशस्य जीवनं
प्रतिभाति क्षतविक्षतस्य मे ॥१०९॥

अपि नाम मधु स्रवेदिदं
गगनं वाऽमृतमेव निर्झरेत् ।
सकलं ननु मन्यते वृथा
क्षणिकस्यापि पुरः स्मितस्य ते ॥११०॥

मधुनीह यदेव सीमितं
विहितं किञ्चन जीवनं मया ।
विफले जगतीह सर्वथा
सफलत्वं हि तदेकमेव मे ॥१११॥

कथमण्वपि नानुकूलतां
भजते त्वद्धृदयं नु मय्यहो ।
मधुनोऽधिगमाय साम्प्रतं
कियदाशानुगतेन याप्यताम् ॥११२॥

प्रखरैस्तपनस्य रश्मिभिः
परितप्तैव वसुन्धरा सती ।
लभते विततेभ्य आतता
जलमातृप्ति घनेभ्य उन्मुखी ॥११३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

जलदे त्वयि दूरगे यदा
गगनात् पुञ्जितधूममण्डितात् ।
बत नापगता पिपासुता
मरुभूमेर्यदि कोऽत्र विस्मयः ॥११४॥

बहुधा कथितां पुनः पुनः
कथयामीह कथां निजामहम् ।
मुखरत्वमिदं हि बाष्पवत्
त्वयि मूके नभसीव लीयते ॥११५॥

सुरभिस्तव रे त्वदर्थ इ-
त्युपकल्प्यास्मि न तत्र रागवान् ।
त्वदनुग्रह एष स त्वया
हसता मह्यमुपायनीकृतः ॥११६॥

घटितो ह्यनुराग एव मे
निजयर्काकितया किमान्तरः ।
यदिमां न परित्यजाम्यहं
यदियं मां न परत्यजत्यसौ ॥११७॥

इह दुःखमये धरातले
यदि मन्ये सुखमस्ति किञ्चन ।
मधुपानमिदं तया समं
क्षणलब्धं ननु तस्य साधकम् ॥११८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मधुपानप्रसङ्गभाषिता-
न्यतिमात्रं सहजानि मे पुनः ।
नहि कृत्रिमताऽत्र कल्प्यतां
शृणु मत्ताः प्रलपन्ति नैव ॥११९॥

मम नाम्नि गते श्रुतिं तथा
निरपेक्षा दृगजायतेव ते ।
तव चित्तगतो न केनचित्
प्रणयो मद्विषयो विशङ्कितः ॥१२०॥

मम मौनमिदं यदा न ते
किमपि त्वां विनिवेदने क्षमम् ।
हृदयान्मम निर्गतस्तदा
किमु भग्नाद् विनिवेदयेत् स्वरः ॥१२१॥

अपि कोऽपि तव प्रसत्तये
सदुपायः सुभगेऽवशिष्यते ।
इह निर्दिश तं न यावता
गगनादस्तमुपैति भानुमान् ॥१२२॥

कुसुमैः समलङ्कृता लता
जनयत्येव तथा मुदं हृदि ।
कलिता नवयौवनेन ते
सुखदा काऽपि तवाङ्गयष्टिका ॥१२३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

सुधया समकक्षतां वद-
न्त्यधरस्थस्य रसस्य ते जनाः ।
विहसामि विचिन्त्य तामहं
सुरजुष्टामथ जीर्णतां गताम् ॥१२४॥

अधरो रस एव तेऽथवा
रसभिन्नोऽधर एव वर्तते ।
इदमाकलयन् मधुस्मिते
नहि सिद्धान्तधियं न्यवेशयम् ॥१२५॥

प्रथमं न जिघृक्षति क्षणा-
दतिसङ्कोचवशात् पिबत्यथ ।
भजते खलु दर्शनीयतां
मधुपानाभिनयेन धार्मिकः ॥१२६॥

सुरभिः सततं मधुप्रपां
परिवृत्यैव नु कोऽपि तिष्ठति ।
परिचीयत एव दूरतः
स्थितिरस्याः सततं पिपासुभिः ॥१२७॥

नहि कोऽपि पिपासुरीदृशो
मधुशालां समतिक्रमेत यः ।
विदधाति तदन्यथैव यः
स्वपिपासां स बिभर्ति निष्फलाम् ॥१२८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

तव रे ज्वलतीव यः शनै-
रधिहृद्देहलि कोऽपि दीपकः ।
नहि तं प्रशमं नयेः पुन-
र्वितरेत् स्नेहकणं स आगतः ॥१२९॥

न शृणोति तव व्यथां यदा
स जनो यच्छ्रवणाय भाषसे ।
विनिवेदितया यतस्ततो
व्यथया सिद्ध्यति किं तदा तव ॥१३०॥

इदमेव मया प्रतीक्ष्यते
यदितः कऽपि कृपाघनस्तव ।
समुदीय मदीयमुन्मदः
क्षणमस्तित्वमरुं समाद्रयेत् ॥१३१॥

तव चेष्टितनाटकस्य को
विषये किञ्चन भाषितुं क्षमः ।
विनिपातनशालिता क्वचित्
क्वचिदुत्थापनवृत्तिरस्ति ते ॥१३२॥

कतिचित् प्रपिबन्ति तत्करा-
दुपलब्धं मधु मौनमाश्रिताः ।
कतिचित्तु पिबन्त आत्मना
कलहायन्त इमे परस्परम् ॥१३३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

अधिकार इतीव केचन
प्रपिबन्तो मधु दर्शयन्त्यमी ।
नियतं खलु तत्प्रसाद इ-
त्यवगत्यैव निपीयते मया ॥१३४॥

पवनाम्बुवदस्मि सर्वतः
सुलभोऽहं ननु यस्य कस्यचित् ।
नहि मामियताऽवमानये-
र्मदलाभे नहि जीवितासि रे ॥१३५॥

कृत एष विनैव भूमिकां
विषयोपक्रम इत्थमात्मना ।
अधिगत्य मम क्षमस्व वाग्-
व्यवहारे विकलत्वमीदृशम् ॥१३६॥

मम मौनमिदं दृढीकुरु
विकलोऽहं खलु वागसंयमात् ।
कुशली त्वहमेक एव मां
चिरमेकाकितया नियोजय ॥१३७॥

क्वचिदग्निशिखा गतैव मे
परितो व्याप्य तमो हि मां स्थितम् ।
स्वमिह व्यथितोऽस्मि सर्वथा
चिरधूमायितमुद्वहन्नहम् ॥१३८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

सुखमेव मिलेदितीव रे
भुवि सामान्यजनस्य काङ्क्षितम् ।
मधु गर्हितमस्ति सर्वथा
ननु येषां दृशि ते तु कोविदाः ॥१३९॥

अविवेकवतां तु मादृशां
मधु सर्वस्वमितीव धारणा ।
मधु तेन निपीय दूरतो
जडमृत्पात्रमदो निधीयते ॥१४०॥

तम एव ममाग्रतः स्फुरत्य-
धुना तद्गतचेतसो भृशम् ।
किमु नाम तयाऽञ्जनेन ते
नयने स्वे कुटिले नियोजिते ॥१४१॥

चपले चपलाऽसि ते गतिं
ननु जाने परमेष कामये ।
तमसा भरितोऽस्मि साम्प्रतं
क्षणमेकं खलु सन्निधेहि मे ॥१४२॥

कियतेतदुपाददे गतं
निजमस्तित्वमरे विकीर्णताम् ।
इह सङ्ग्रहणे मम क्षता
नितरामङ्गुलयोऽस्य साम्प्रतम् ॥१४३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

तव चेतसि काऽपि सिन्धुवत्
करुणा मां प्रति किं तरङ्गिता ।
मम चित्तमिह त्वदुन्मुखं
किमपि क्षिप्रमिवानुधावति ॥१४४॥

यदुदीर्य विलज्जितो भवा-
म्यहमात्मानमलज्ञ भर्त्सयन् ।
तदुदीर्य तु वाग्मितां निजां
सुहृदः केचिदुदाहरन्त्यलम् ॥१४५॥

स्मितमात्रमपि स्फुरेत्तव
क्षणमस्मिन्नधराख्यरङ्गके ।
कियता समयेन मण्डली
विनिमेषा सुहृदां प्रतीक्षते ॥१४६॥

दिवि विद्युदिव स्फुरत्यसा-
विह तस्याः स्मितमित्यनुग्रहः ।
मम मादकतां भजत्यहो
मधु तत्स्पर्शमवाप्य सर्वथा ॥१४७॥

रुदितैर्भरितेषु नैव चेत्
क्षणमास्येषु समानयः स्मितम् ।
तव सर्वमिदं वृथाऽर्चनं
हृदि मासाह मदीयहृद्गतः ॥१४८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

अधुना मम सन्निमज्जने
　　नहि सन्देहलवोऽवशिष्यते ।
किंयदेव विलम्बसे कदा
　　भुजनौस्ते प्रकटीभविष्यति ॥१४९॥

न सरांस्युपगम्य याचितं
　　सरितो नाप्युपगम्य याचितम् ।
वद याच इतः कुतो न्वहं
　　त्वयि रे क्षीरनिधावुपस्थिते ॥१५०॥

विममज्ज मयि स्वरावलिः
　　स्वरहीने सकलाऽपि मामकी ।
अधुना मदनन्त मादनं
　　वद रायं कमिव प्रतीक्षसे ॥१५१॥

बहवो बत ताडयन्ति मां
　　लगुडैश्चापि च लोष्टकैरपि ।
फलितेन मया महत् फलं
　　तदिदं प्रत्यहमेव लभ्यते ॥१५२॥

मधुपानगृहेऽपि निद्रया
　　विनिमीलन्ति य एव सङ्गताः ।
नियतं मधुवञ्चिताश्च ते
　　विफला एव विनिःसरन्त्यहो ॥१५३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

यदि भूमिकया तया जनो
मधुमत्या नहि भावितोऽभवत् ।
मधुपानरसो न तद्धृदि
क्षणमप्युल्लसतीह तावता ॥१५४॥

मम नाशय पक्षतिद्वयं
ननु मां पञ्जरके निवेशय ।
परमुड्डयनाय लालसां
मयि जातां कथमेव रोत्स्यसि ॥१५५॥

अधराङ्गुलिचेष्टया जनः
सकलो मां कथनान्न्यवारयत् ।
रिपुरित्यभिधीयते रिपु-
स्त्रुटिरित्येवमुदाहरन्ति मे ॥१५६॥

सुतरां भवसीह लक्षितो
हसिते मुग्धतमे शिशोर्यथा ।
मनसीह तथैव मामके
स्फुर नेपथ्यगतो न तिष्ठ रे ॥१५७॥

मृदुकेशचयेषु सर्वदा
तव कौटिल्यमिदं तु लक्षितम् ।
तव हृद्गतमेव तत् ततः
स्फुरतीत्याहुरमी विचक्षणाः ॥१५८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

निजकं किमपि प्रकाशया-
    म्यहमन्तर्गतमात्मना यदि ।
तम एव हनिष्यतीह मां
    किरणो हन्त च भक्षयिष्यति ॥१५९॥

स्मृत एव मनोपजायते
    मधुनाम्नीव मदो नु पानके ।
उपलभ्य तु तत्करात् क्षणं
    परिपीते मधुनीह का स्थितिः ॥१६०॥

अयशस्करमेव साम्प्रतं
    त्वयि मत्प्रार्थितमेवमित्यहम् ।
पुरतस्तव मौनितां भजे
    सकलं वेत्सि हृदि स्थितं मम ॥१६१॥

व्रजतीह न मेऽनुकूलतां
    मधुपायिन्यतिमात्रनिष्ठुरा ।
समवापि जयस्तयाऽधुना
    मम पक्षे त्वभवत् पराजयः ॥१६२॥

तव रूपमपूर्वमादरात्
    स्वदृगासेचनकं हि चिन्त्यते ।
स्वदशा त्वदुपेक्षया भृशं
    दयनीया तु विशिष्य चिन्त्यते ॥१६३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मम दीप उपैतु सूर्यता-
मिति लोके सकलोऽपि चेष्टते।
मृगये किरणानहं कर-
स्थितनिर्वाणप्रदीप आत्मना ॥१६४॥

अथ भारमिवापरो जनोऽ-
नुभवेन्मामिह को नु विस्मयः।
यदि भार इवास्मि मत्कृते
स्वयमेवाहमतीव दुर्वहः ॥१६५॥

मयि नाम हसन्ति मत्त इ-
त्यथ ये केऽपि हसन्तु न क्षतिः।
हसितं मम हन्त जायते
भृशमेकाकिनि मत्त आत्मनि ॥१६६॥

मम मज्जय रे मदं मद-
श्रुणि कश्चित्कविवर्य ऊचिवान्।
परिवर्त्य तदेतदुच्यते
नय मेऽस्मितत्वमिदं मदश्रुताम् ॥१६७॥

भवतीह यदेव यस्य वा
भुवनेऽभीप्सितवस्तु किञ्चन।
लभते स तदेव नात्मना
पय इच्छन् मधु कश्चिदाप्नुयात् ॥१६८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

प्रतपंस्तपनो मम व्यथां
जनयत्येष न हन्त तावतीम् ।
प्रतिकूलविधेर्हि यावतीं
सरसाऽऽर्द्रा जगतीह चन्द्रिका ॥१६९॥

नहि वोढुमहं क्षमो विधेः
कथमप्यस्मि कृपां गरीयसीम् ।
कृपया कथमेव मां सुहृद्-
गण आभारभरं विधित्सति ॥१७०॥

सफलोऽपि जगज्जये जनः
स्वजनेभ्यो लभते पराजयम् ।
जलधेस्तरणे क्षमाऽपि नौ-
र्विनिमज्जत्यतरङ्गके तटे ॥१७१॥

व्यथिता भव नैव भग्नया
निजतन्त्र्या परिवादिनि क्षणम् ।
त्वयि नृत्यपरायणा इमा
मम पश्य क्षतविक्षताङ्गुलीः ॥१७२॥

कुसुमस्य भुवि व्यथां जनो
निजवृन्तात् पतितस्य वेद कः ।
यदुदेत्युषसि प्रवर्धते
दिनमध्ये निपतत्यधिक्षपम् ॥१७३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मधुनोऽनुपलब्धिसङ्कृतं
मम नैराश्यमिदं न कल्प्यताम् ।
फलितस्तदनुग्रहो मया
यदनेनाप्ययनेन मन्यते ॥१७४॥

निपतेत् तव पाणितः पुरो
मधु पात्रेष्वपिपासुताजुषाम् ।
नियतं त्वदभिन्नतां गता
न वयं सोढुमिदं क्षमामहे ॥१७५॥

त्वमशब्दमितो गता शता-
धिकखण्डेष्वनुभूय भग्नताम् ।
मयि सैव तव स्थितिः स्मृता
जनयत्यद्भुतशब्दसन्ततिम् ॥१७६॥

तमसो विनिवारणे क्षमा
बहवः सन्ति न मे प्रयोजनम् ।
प्रशमं नय भस्मनीह मां
न मया प्रज्वलतेह याप्यते ॥१७७॥

तपतस्तपनस्य शस्यते
ननु शैत्यप्रकृतेर्जलस्य च ।
कमलस्य च जन्मभूरिदं
पुनरन्यश्च विकासकारणम् ॥१७८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

शुचिना निजसुस्मितेन रे
क्षणिकेनाद्य मनोतिहारिणा ।
इह सार्थकतां शुभे नय
प्रणतीमें विकला निरन्तराः ॥१७९॥

विकस त्यभिलक्ष्य कल्प्यते
ह्यभितो मां कुसुमानि मानिनि ।
त्वमदृश्यमुपेत्य सर्वतः
स्मितरश्मीन् सुबहूनवाकिरः ॥१८०॥

त्वरया स विनिर्गतः पुनः
प्रविशन्नेव किमाह मां जनः ।
नहि वेद न तस्य वेद योऽ-
हमिदानीं विकलः पिपासया ॥१८१॥

मधुपानप्रसङ्गतः सदा
ननु वर्ज्या मधुपायिषु त्वरा ।
अनया सहजेति कस्यचि-
न्न पिपासाऽस्य जनस्य सिध्यति ॥१८२॥

परमाणुमिमं न मां जनाः
किमपि स्फोटयतैवमन्यथा ।
परिणाममवाप्नुयादयं
नगरोद्यानगणो नु भस्मनि ॥१८३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

सकलादिह मत्त इत्यहं
तव हेतोः स्वजनादुपेक्षितः ।
इह किञ्चिदुपेक्षसे त्वम-
प्यथ मां का नु गतिर्भवेन्मम ॥१८४॥

उपहृत्य कणान् प्रदर्शय-
न्त्यतिमात्रं स्वकृपां जना यदि ।
नहि कोऽपि कृपानिधेरतव
स्मरतीत्येव ममास्ति विस्मयः ॥१८५॥

घटनावशतो यदङ्गुले-
र्मम हृत्तन्त्रि गतासि भग्नताम् ।
इह सम्प्रति योजयिष्यति
व्यथिते त्वां व्यथिता तदङ्गुलिः ॥१८६॥

प्रभवत्यरितो भयं हृदि
श्रुतमद्यावधि लोकतो मया ।
परमद्य सुहृद्भ्य एव मे
भयमुत्पद्यत एष विस्मयः ॥१८७॥

विरमेयमहं तव प्रपां
प्रति गच्छन्न पिपासयाऽधुना ।
स्वकरान्मधु मेऽर्पयेर्न वा
त्वदधीनः परमेष निर्णयः ॥१८८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

भवतीह क आतपत्रभृत्
स्वकरेऽस्मिन् मधुनि प्रवर्षति ।
अवरोधमुपेत्य सर्वथा
मधुशालां प्रविशन्ति पायिनः ॥१८९॥

मधुपात्रमपूरितं तया
यदपात्राय समर्पितं ततः ।
विनिवारणमेव तत्कृतं
ननु भङ्ग्या ह्यनया कथञ्चन ॥१९०॥

विजयं ह्यथवा पराजयं
जन आप्नोति विधेर्वशादिह ।
विजयेऽपि निजे पराजितो
न्विव खिन्नोऽस्म्यनुमीय तद्व्यथाः ॥१९१॥

परितापभरोऽप्यपेक्ष्यते
परिशुद्ध्यर्थमवश्यमन्यथा ।
सुखमात्रपरायणो जनः
सुखलब्धस्य सुखस्य न स्मरेत् ॥१९२॥

शृणुयादिह कोऽपि वा न वा
व्यथितस्यास्ति निवेदनं न मे ।
व्यवसाययतीव भाषितुं
किमपीत्थं हृदयं तदुच्यते ॥१९३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

श्रवणाय यदीह सज्जसे
विनिवेद्यं बहु हन्त किन्त्वियम्।
विनिवेदनपद्धतिस्तु मे
कथनान्मौनमहो वरं मता ॥१९४॥

यदिदं मधु मृण्मये त्वया
निहितं मच्चषके स्वपाणिना।
मम सर्वमपीह चेष्टितं
ननु तस्यैव फलं विशेषतः ॥१९५॥

मिलिते मधुनीह सर्वथा
शममायाति विकल्पसंहतिः।
सुतरामनुभूतिगोचरं
सुखमेतत्फलभाक् तृषाधिकः ॥१९६॥

अभवन्मम जीवनाश्रयः
स्मितमित्थं तव कोऽपि वेद नो।
स्वरहस्यमिदं हि गोपितं
कृपणेनेव धनं मया हृदि ॥१९७॥

मृगये ननु विस्मृतिं गतं
क्वचिदात्मानमहं तथाऽऽत्मनि।
स्वकरेण विखण्डितं गवे-
षयति क्रीडनकं शिशुर्यथा ॥१९८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

क्रियता नियमेन पूजय-
    न्त्यथ निर्वाणमसुं प्रदीपकम् ।
तमसा कृतसन्धयो जनाः
    समुपेत्य ज्वलितान् प्रदीपकान् ॥१९९॥

मयि कः स्वकरेण निक्षिपेत्
    किमपि स्नेहमथांशुभिः क्षणम् ।
बत सङ्गमयेच्च को नु मां
    शृणु निर्वाण इहास्मि दीपकः ॥२००॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

तृतीयं शतकम्

किमपि त्रपते मधुप्रपां
प्रथमं कश्चिदुपागतो जनः ।
विगतेषु दिनेषु केषुचित्
स्वयमागत्य मधु प्रतीक्षते ॥२०१॥

मधुभाषितकानि गर्हिता-
न्यतिमात्रं जनसंसदि स्फुटम् ।
इह मौनितयाऽत एव रे
स्थितमात्मानमपश्यता मया ॥२०२॥

प्रविशन्ति मधुप्रपामिमां
बहवो दोषविशीर्णबुद्धयः ।
मधुभावविदां कृते तदा
भवतीदं सुमहत् त्रपाकरम् ॥२०३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

क्षिपति स्वकरेण कर्दमं
मयि यः कोऽपि निलीय दूरतः।
स दयालुरिव प्रतीयते
दृषदो यन्न मयि क्षिपत्यसौ ॥२०४॥

तदपाङ्गनिरीक्षणे च तद्-
वचने तद्गमने च सर्वतः।
मनसो हरिणस्य हारि मे
मधुसङ्गीतमिवानुभूयते ॥२०५॥

इह केचन मां द्विषन्ति ये
नियतं ते मयि संस्थिते जनाः।
निजमेव सुकृत्यमन्यथा
कलयिष्यन्ति रुदन्त आत्मनि ॥२०६॥

कुसुमाय करौ प्रसारितौ
मिलिताः केचन कण्टका अमी।
किमयाचितकव्रतं चरन्
कुसुमं त्वत्करतो लभेय रे ॥२०७॥

श्रुतिमेति कुतोऽपि चेतसि
द्रवयन् मां तव नूपुरध्वनिः।
विमृशामि तदुद्गमो भवे-
दथ नेदीयसि वा दवीयसि ॥२०८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

सुखमेकमिहास्ति लभ्यमि-
त्यधिकं भ्रान्तधियो विजानते ।
न वयं मधुपायिनस्तथा
भ्रमिताः केऽपि तया सुखाशया ॥२०९॥

विहितानि न यानि कानिचिद्
भुवि मित्राणि विशङ्किना मया ।
अथवा मधुपानमेव मे
सुबहूनाशु नयेत्सुहृत्तमान् ॥२१०॥

प्रतिकूलतया तव भ्रुवोः
प्रतपेत् प्रावृडिहांशुभिः खरैः ।
गमिते तु दयार्द्रतां त्वयि
प्रखरो ग्रीष्म इहार्द्रतां व्रजेत् ॥२११॥

अनलो बहिरेष कोऽपि मां
परितः किञ्चिदयं दिधक्षति ।
मम कोऽपि महामरुर्मन-
स्थलमस्तित्वमिवालिलिक्षति ॥२१२॥

परिवार्य य एव मां पुरा
समतिष्ठन्त त एव साम्प्रतम् ।
सुहृदः समवेक्ष्य दूरतः
स्वपथं सम्परिवर्तयन्त्यहो ॥२१३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

न कटाक्षितकस्य किन्नु ते-
ऽस्ति चमत्कार इतः शुभेक्षणे ।
किमपि प्रभवत्युदीरितुं
जन एषोऽपि यदीयगोचरः ॥२१४॥

हृदयं झटिति द्रुतं भवेत्
क्षणमेकं ननु गाय हे कवे ।
व्यथितोऽहमर्थनकैः कटु-
स्वर्णितैः सम्प्रति कण्टकैरिव ॥२१५॥

मधुमन्ति निरीक्षितानि ते
मधुमन्तीह सुभाषितानि ते ।
मिलितान्मधुनोऽपि तत्करा-
दधिकं मां मदयन्ति साम्प्रतम् ॥२१६॥

अधिकाय क एव ते·करा-
दिह लाभाय जनस्त्वरेत चेत् ।
चषके स्मितपूर्वमादरा-
दुपलभ्येत समुच्छलन्मधु ॥२१७॥

सुकटूनि तिरस्कृतानि ते
सुमधूनीह च भाषितानि ते ।
नयतीव विरोधि तद् द्वयं
मधु किञ्चैकपदे समन्वितम् ॥२१८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

तमसा सह किन्नु मे दृढं
घटितं सख्यमिहैव जीवने ।
किरणस्य लवोऽपि येन मां
व्यथयत्येष उपागतोऽन्तिकम् ॥२१९॥

चपकस्य कृते न खिद्यते
तव हस्तामिलितस्य संसदि ।
धिगिमां तव बद्धमुष्टितां
स्वकटाक्षोऽपि निवारितस्त्वया ॥२२०॥

क्वचिदन्यत एव गम्यते
यदि गन्तव्यत आत्मना मया ।
तदपि स्पृहणीयमेव मे
भृशमेकाकिन एव गच्छतः ॥२२१॥

पवनो ननु यः समागत-
स्तव स स्पर्शमवाप्तवान् न वा ।
इति चेतसि संशयं गतो
नहि तत्स्वागतमेवमाचरम् ॥२२२॥

सकलं खलु दृश्यमात्रकं
किमरूपस्य तवैव रूपकम् ।
रमणीयतयाऽस्य कल्प्यते
त्वमपि स्या रमणीय एव रे ॥२२३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

श्वसितादपि जीवनादपि
क्षणलब्धं मधु यन्नु मे प्रियम् ।
तदिदं हि रहस्यमात्मनः
कथयेद् वा क उपेत्य पायिनीम् ॥२२४॥

मम वाग् विनिवर्तिता ततः
किमपि स्पर्शमनाप्तवत्यहो ।
अवगत्य तथापि चेष्टितै-
र्मधुनो मां नहि वञ्चयत्यसौ ॥२२५॥

प्रणयो मम तत्र जायते
प्रणयं किञ्चन या न मन्यते ।
अवरोद्‌धुमिदं न शक्यते
हृदयं प्रीतिवशीकृतं मया ॥२२६॥

श्रवसी तु पिधाय याप्यते
कटुकोलाहलपूरिते भवे ।
विरलो मुरलीरवस्तव
क्वचिदायास्यति कर्णगोचरम् ॥२२७॥

गमयालमिमानि पल्वला-
न्यपि रे मानसतां स्ववीक्षितैः ।
यदि सम्प्रति काकपेयतां
गमितेष्वेषु कृपालवस्तव ॥२२८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

विगता इह तिष्ठतोऽस्य रे
न वसन्ताः कति, देहि वाऽग्नये।
कठिनातपतापपीडितं
तमिमं स्थाणुमुपेक्षसे कियत् ॥२२९॥

झटिति द्रुतिमेति यस्तथा
कठिनत्वं प्रतिपद्यते च यः।
नहि विश्वसिमो जने प्रिये
निकटस्थेऽपि च हन्त दूरगे ॥२३०॥

स्थितिमेवमिमां कियत्सहे
प्रतिकूलां विकलः पिपासया।
परितो वत ते समुच्छल-
ज्जलराशीनि सरांसि जाग्रति ॥२३१॥

असवोऽपि समर्पणीयतां
जलदात्रेऽथ भजन्त एव चेत्।
मधुदात्रि भवेन्नु केन वा
तव रे प्रत्युपकार आत्मना ॥२३२॥

मृदु किञ्चन तस्य भाषितं
मृदु रे तस्य च रूपमद्भुतम्।
कठिनं मृदु वेति तद्धृदो
विषये वक्तुमितो न शक्यते ॥२३३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

हृदयेऽनुभवाम्यहं त्रपा-
मभिधायाकुलतां पुरस्तव ।
कलिता ननु सा त्वयाऽन्यथा
प्रणयो मेऽभवदेष नाटकम् ॥२३४॥

नहि भाषितकानि केवलं
स्मितमासीदपि हन्त ते छलम् ।
विषमं विषमप्यहो मया-
ऽमृतमित्येव तवोररीकृतम् ॥२३५॥

नियमेन यतो यदौषधात्
प्रविनश्यन्ति रुजाः समन्ततः ।
तदपीह रुजैव चेत्तदा
किमु वाच्यं प्रणयो न ईदृशः ॥२३६॥

प्रणये हि सति प्रकाशिते
हृदि दातृत्वमुपैति सर्वथा ।
किमिवेह निवेद्यतां ततो
निजमस्यै मधु गृह्णता मया ॥२३७॥

सुबहोः समयादकारणं
विपरीतस्य विधेः किमुच्यताम् ।
समपीडयदातपो यथा
व्यथितश्चन्द्रिकयाऽप्यहं तथा ॥२३८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

लघुजीव उपागतो नु यो
रुदितापूरितजीवने मयि ।
कविना समुपेक्षितो भवे-
च्छरविद्धः स खगोऽन्यजन्मनि ॥२३९॥

पतितं तव केशपाशतः
कुसुमं तेन न काऽपि ते क्षतिः ।
उपलभ्य तदेव जीवनं
सफलं त्वद्गतचेतसामभूत् ॥२४०॥

तव नाम शपेऽधरोष्ठयोः
कृतनृत्याय मधुस्मिताय रे ।
तृषितेन किमप्यधायि नो-
पगतेनापि मया सुधाम्बुधिम् ॥२४१॥

इह केचन पापपुण्ययोः
परिभाषां रचयन्ति धार्मिकाः ।
उपदेशकता किमीदृशा-
मधिकारः किमिवाथ जीविका ॥२४२॥

प्रकटीभवतीह कश्चना-
विनयो मद्व्यवहारतो यदा ।
मधुपोऽयमिति त्वया तदा
भवितव्यं कृपया क्षमार्द्रया ॥२४३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मम रे मधुपानशालिका
नियतायां भुवि नैव वर्तते।
मधु तत्करतो यतो लभे
मधुशाला तत एव जायते ॥२४४॥

इयता मुखरेण हृद्गतं
न मयाऽद्यावधि तन्निवेदितम्।
मम यस्य निवेदनाय वा-
गधिजिह्वं विकलेव तिष्ठति ॥२४५॥

बहु वर्षति ते कृपा क्वचित्
क्वचिदल्पं न च सर्वथा क्वचित्।
मनसः किमु वर्णयाम्यहं
नहि कस्याऽपि तृप्यति स्थितौ ॥२४६॥

विजयस्य न ते पराजय-
स्य न मे प्रश्न उदेति साम्प्रतम्।
विजयस्तु पराजयेऽपि मे
प्रथते कस्य च तत्र संशयः ॥२४७॥

न जनः स्वररागवित् क्वचि-
च्छृणुते श्रोतुमहो न चेष्टते।
इह वायससङ्कुले स्थले
पिक मूकायितमेव ते वरम् ॥२४८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मलिनान्यभवन् सुमान्यहो
क्षणमुद्यानगतं विलोक्य माम् ।
अयि यद् विहितं न कण्टकै-
र्मदुदासीनतया नु तत् कृतम् ॥२४९॥

प्रविकासयितुं प्रदीपकैः
कमलानीह कथं नु चेष्टसे ।
उररीकुरुषे न साम्प्रतं
कथमस्तित्वमिदं विभावसोः ॥२५०॥

प्रणयीति कदाचिदात्मनो
हृदयेनाभवमेव वञ्चितः ।
गत एव मधुप्रपामहं
मधु तस्याः करतो न लब्धवान् ॥२५१॥

भजते वचनीयतां जनः
स्वयमङ्गीकृतकान्यपालयन् ।
मम तु व्यथितं तदेव य-
न्मधु गृह्णन्नपि नैव पीतवान् ॥२५२॥

भजते स्वररागतां परा-
मिह शब्दस्तु स एव चिन्त्यते ।
नहि तस्य ममाभिकाङ्क्षितं
बत कोलाहलतां भजेत यः ॥२५३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

समलोकि मया स धार्मिको
मधुशालां प्रविशन् द्रुतं तदा।
तत एव यदा विनःसर-
न्नहमासं मधुपानगर्वितः ॥२५४॥

कलिकाऽनुभवेदिहान्यथा
मधुना किञ्चन भाषितेन मे।
अपि सत्यमिदं तथाप्यहो
मम मूकायितमेव शोभनम् ॥२५५॥

चरणान्तिकगो भवानि ते
प्रभवानीति मया विचेष्टितम्।
अफलत्वमगादिदं तथा
जनसम्मर्द इतः प्रतिष्ठिते ॥२५६॥

नियतं परिवर्तनानि म-
य्यभवंस्त्वदृगशेषगोचरे।
नहि वेद्मि मया कृतं न वा
किमपीत्थं परिवर्तनं त्वयि ॥२५७॥

मयि शाप इतीव पातितं
यदिहैकान्तिकजीवनं त्वया।
अधुना तु तदेव सर्वथा
मधुगर्भैश्चषकैः प्रफुल्लति ॥२५८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

अहितो हितमाचरेद् यदा
स्वजनश्चेत् प्रतिकूलतां चरेत् ।
प्रतपेद् विधुरम्बरे तदा
मम रे मौनमिति प्रतिक्रिया ॥२५९॥

तव मां प्रति काऽपि लक्ष्यते
मम दौर्भाग्यफलाऽन्यथामतिः ।
द्युतिमानयति स्म न त्वयि
प्रणतिर्मे तत एव सन्तता ॥२६०॥

स्खलिता हि पदे पदेऽधुना
मम शब्दाः कथमेव पङ्गवः ।
इह यान्तु समे त्वदन्तिकं
यदि नैतान् सदयाऽवधारयेः ॥२६१॥

अनिमित्तमिव प्रहृष्यते-
ऽथ विना कारणमेव रुद्यते ।
इति या प्रकृतिर्ममाभवत्
किमिवासौ प्रणयस्य चेष्टितम् ॥२६२॥

स्वपिपासुतयेह यापितं
स्वपिपासैव हि सम्पदस्ति मे ।
कुशला जलदा भवन्तु ते
कुशलान्येव सरोवराण्यपि ॥२६३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

नहि मां व्यथयेः पुनः पुन-
निजसौन्दर्यगुणप्रकाशनैः ।
विनिमीलितयैव यद्दृशा
बहुदृष्टं बहु लब्धमेव च ॥२६४॥

छमिति च्छमिति त्वमागता
पुरतो नूपुरमण्डिता तदा ।
मधुपायिन उत्थितास्तदा
निजनिद्रां परिहृत्य सत्वरम् ॥२६५॥

हृदि जागरितामिमां तृषं
प्रशमं सम्प्रति पूर्वमानयेः ।
तदनन्तरमर्थये निजा-
मवरुद्धां मधुशालिकां कुरु ॥२६६॥

स्वपराङ्मुखता पराभवो
भवितेतीव न गम्यते मया ।
अवलोक्य तवान्यथा दृशं
प्रतिकूलां गमनं हि मे वरम् ॥२६७॥

इह सार्थकतां व्रजेदिदं
सकलं जीवनमेव येन मे ।
तदुपाहर वस्तु साम्प्रतं
मयि किञ्चिद् यदि चेत् प्रसीदसि ॥२६८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

जलधिस्त्वमसीति मन्यते
जलदोऽसीत्यपि मन्यते मया ।
हर मे न पिपासुतामिमां
मम सर्वस्वमियं हि साम्प्रतम् ॥२६९॥

तदिहार्पय यत्समीहसे
सफलत्वं विफलत्वमेव वा ।
शिरसा प्रणतेन साम्प्रतं
स्थित एषोऽस्ति जनः पुरस्तव ॥२७०॥

विदितं तव वेदितव्यमि-
त्यथ नास्त्येव ममात्र संशयः ।
मुखरत्वमतो निरर्थकं
भवितेत्येव हि मौनितां भजे ॥२७१॥

मम दीपशिखेव मानसे
स्फुरतीयं मधुपानलालसा ।
प्रशमं झटितीह यात्यसौ
तव न स्नेह इतो मिलेद् यदि ॥२७२॥

घटितं विघटय्य सर्वथा
विधिबालो विहसत्ययं मुहुः ।
प्रविलोक्य तु तद्विचेष्टितं
नहि किञ्चिद् बत वक्तुमुत्सहे ॥२७३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

प्रणयाध्वनि सर्वथाऽस्म्यहं
विफलो हन्त तथापि मानिनि ।
न ममत्वमिदं समुत्सहे
त्वयि जातं सुविहातुमात्मना ॥२७४॥

मयि नाम पराजिते जना
विहसन्तो न विदन्ति बालिशाः ।
इह जेतुमसौ न शक्यते
ननु यस्य प्रकृतौ पराजयः ॥२७५॥

व्यथितस्य विकत्थने नु ये
मुखरास्तेषु दयस्व, किन्तु रे ।
असमर्थतमा निवेदने
ननु मूका अपि सन्त्यनेकशः ॥२७६॥

न यया सविधेऽपि मामकं
क्षणमभ्यर्थितमुत्कया श्रुतम् ।
किमु नाम तया सुदूरतो
गतया श्रोष्यत एव मद्वचः ॥२७७॥

सरलस्य तवास्य रे मधु-
व्यवसायस्य किमेव कथ्यताम् ।
सुबहून् मधुनेह तर्पये-
रथवा कांश्चन मारयेस्तृषा ॥२७८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

लघु सार्थकतां नयेदिदं
यदि मञ्जीवनमीदृशं क्षणम् ।
तव सेवकभावमाप्नुया-
महमाजीवनमेव पार्थिनि ॥२७९॥

मदभीप्सितमद्य पूरितं
यदहं द्वारमुपागतस्तव ।
इति तु त्वयि सर्वथाऽऽहितं
तदिहोद्घाटयसेऽथवा नहि ॥२८०॥

समुदेति घना घनावली
ननु वात्या महती समागता ।
त्वरितं बत संगृहाण मा-
मिह गच्छन्तमरे विकीर्णताम् ॥२८१॥

अतिमात्रमुपैतु चेतना
स्तिमितत्वं हृदये व्यथोदयात् ।
अधरे मृदु किञ्चिदेव मे
स्मितमेकं समुदेति तत्क्षणम् ॥२८२॥

सकलं सहजत्वमाप्नुया-
न्मयि नारोपितमस्तु किञ्चन ।
रुदितं रुदितं भवेन्मम
व्यथितश्च व्यथितं भवेन्मम ॥२८३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मम काऽप्यधिका ग्रहीतृता
तव दातृत्वमधिश्रिता मुहुः ।
मम शून्यतयैतया समं
तव पूर्णत्वमदोऽवतिष्ठते ॥२८४॥

इह कामदुघत्वशोभितां
तव जानामि महीयसीं कृपाम् ।
मम दुर्विधिनैव हेतुना
मयि सा सम्प्रति नैव वर्षति ॥२८५॥

कथमप्यभिधानमेव ते
सति कोलाहलके श्रुतं मया ।
वितरस्यथ कुत्र वा मधु
त्वमिति प्रेक्षितवानहं न रे ॥२८६॥

प्रविशेन्निशितं हृदीह चे-
दपि तस्याः शरवन्निरीक्षितम् ।
मधु मह्यमुपाहरेदसौ
तदपि स्वेन करेण केवलम् ॥२८७॥

किमतृप्तिमहं निजां ब्रवी-
म्यथ सम्प्रत्यपि लज्जितोऽस्म्यहम् ।
त्वयि गोचरतां गतेऽप्यसौ
नहि नश्यत्यधुना करोमि किम् ॥२८८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

विषयत्नुदियं जटामयी
दृढमूला मयि सम्प्रवर्धते ।
त्वसिमां यदि नोच्छिनत्सि चेद्
बहुशाखा भवितेयमुन्नता ॥२८९॥

विरहे तव यापिता मया
न कियन्तो दिवसास्तथाप्यहो ।
पुनरेष पुनर्भणाम्यहं
न विना त्वां श्वसितुं हि शक्यते ॥२९०॥

तव रूपमपूर्वमात्मसात्
प्रविधायेव मदीयमानसम् ।
अधुना स्वयमेव यादिव
प्रतिभातीदमहो विलीनताम् ॥२९१॥

मधुदानपरायणस्य रे
हृदि तस्यापि जनस्य न च्छलम् ।
यदसाविह मय्युपस्थिते
मधुदाने कृपणत्वमाचरेत् ॥२९२॥

बहिरत्र महान् प्रवर्तते
बत कोलाहल एष मद्व्यथा ।
यदहं न समर्थ एव ते
गिरमाकर्णयितुं परां मृदुम् ॥२९३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

रुदितानि शतं तथा शतं
हसितानीह विनैव कारणम् ।
अवलोक्य शिशोरिवास्य मे
सततं यत्स्मयसे कृपा तव ॥२६४॥

अभिवर्षतु वा न वारिदः
प्रवहेद् वा पवनो न शीतलः ।
मम हन्त मरोरिवार्द्रतां
हृदि गूढामपि वेत्सि वा न वा ॥२६५॥

हृदयस्य तवानुकम्पितं
मम सर्वस्वमितीव मन्यताम् ।
यदभाव इतश्च मामकं
क्षणमस्तित्वमिदं न सेत्स्यति ॥२६६॥

उपयान्ति कथं नु मां मरुं
कतिचिज्ज्ञातिजनाः पिपासितम् ।
स्वयमेव पिपासया म्रिये
निजकाश्रूण्यपि यान्ति शुष्कताम् ॥२६७॥

हृदये कुरुते दवीयसो
निकटस्थान् कुरुते बहिःस्थितान् ।
किमयं नियमो मधुप्रपा-
गतया नायिकयोररीकृतः ॥२६८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

निजगौरवमात्रदष्ट्यो
लघुतामेव महान्त आप्नुवन् ।
लघवो मधुपानजीवना
लघु तत्संसदि गौरवं गताः ॥२९९॥

विरम क्षणमेकमेव मां
भृशमाकारय न व्यथे मम ।
मृदु किञ्चिदतीव कर्णयोः
समुपेतीव तदीयभाषितम् ॥३००॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

चतुर्थं शतकम्

परिकल्प्यत एव चेतसि
त्वमनेनैव पथा गतो भवेः ।
तव नाम तनोरिव क्षणं
सुरभिः कोऽप्यनुभूयते मया ॥३०१॥

रचितं न च नीडमात्मनो
विहितो नापि च जीविकोद्यमः ।
विधिनोत्थितयेह वात्यया-
ऽथ ममोद्यानमिदं विनाशितम् ॥३०२॥

विगलत् किमपीव जायते
कठिनं प्रस्तरवन्नु मे हृदि ।
प्रभवामि नतो यदा तव
प्रगुणे श्रीचरणाम्बुजद्वये ॥३०३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

यदि मौनमलं मम त्वयि
व्यथितस्य प्रभवेन्निवेदने।
मुखरत्वमहं निजं ततः
परिहायाधिकमौनितां भजे ॥३०४॥

प्रणयाख्यमिदं हि नाटकं
कथमेवाविकलं प्रवर्तताम्।
यदि तस्य न सूत्रधारतां
प्रतिपत्तुं त्वमितो नु सज्जसे ॥३०५॥

छलितं सुतरामिहाशया
विनिवृत्तं बत तावकाद् गृहात्।
क इह क्षणमप्युदीक्ष्य मां
बतमूरीकुरुतां दयापरः ॥३०६॥

मम नाम सुखं गृहाण रे
न ततः सेत्स्यति मत्प्रयोजनम्।
त्वदवाप्तिफलां शुभाधिकां
महतीं कामपि वेदनां श्रये ॥३०७॥

मम काचन वाग्विहङ्गिका
सुवराकी हृदयाख्यनीडजा।
सुविशालमिवावगाहते
भवदस्तित्वनभो यथाबलम् ॥३०८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

सहते जगतीह साम्प्रतं
न मदस्तित्वमहो कथं जनः ।
इह नास्म्यनिवार्य ईदृशो
न च कामप्यधिकां श्रियं भजे ॥३०९॥

सततं हृदि वर्धितां स्पृहां
कियतीं त्वद्विषयां नहि श्रये ।
त्वदविश्वसितस्य भाजनं
भवितास्म्येतदुदीर्य केवलम् ॥३१०॥

कुसुमावलिषु व्यथामहं
नहि मृद्वीषु कदापि कामये ।
परमत्र नु किं विधीयता-
मिह जन्मन्यपि कण्टकोऽभवम् ॥३११॥

स्मरणं मधु तस्य केवलं
शुभनाम्नस्त्वितरन्निरर्थकम् ।
इति सारमधीत्य सर्वतो
मधुमन्तो विरता हि केचन ॥३१२॥

कठिनं मयि यच्च यच्च रे
द्रुतमेव द्रुतमेव तत्कुरु ।
मधु किञ्चिदिदं कलङ्कितं
न भवेत् त्वत्करलब्धमन्यथा ॥३१३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

सकलं जगदेव मे कृते
यदधन्यस्य कठोरतां गतम् ।
अपि हन्त कठोरतां गते
त्वयि कुत्रायमकिञ्चनो व्रजेत् ॥३१४॥

पतितं न विलोकयस्यहो
निजके द्वारि कथञ्चिदेव माम् ।
मयि किञ्चिदकिञ्चनेऽपि किं
नहि वर्षिष्यति ते दयाघनः ॥३१५॥

अवगच्छसि मूकभाषिता-
न्यपि मामाहुरिदं जना इमे ।
इह पश्यसि मां न मूकतां
प्रतिपन्नं चिरमग्रतः स्थितम् ॥३१६॥

प्रहरन्ति विनाऽपराधम-
प्यथ बाला निजदर्पतुष्टये ।
अवलोक्य विपद्गतं नु मां
त्वमकिञ्चित्कर एव रोदिषि ॥३१७॥

सुहृदस्तव निर्गता गृहाद्
बहवोऽमी फलितस्ववाञ्छिताः ।
इह जर्जरितोऽस्मि तोरण-
स्रगिवाहं सुचिराद् बहिःस्थितः ॥३१८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मधुभृज्ज्वलतीह दीपको
मम हृज्जर्जरमन्दिराङ्गणे ।
सुहृदेष इतो मया समं
निशि जागर्ति शनैः शनैर्ज्वलन् ॥३१९॥

धृतया हृदयैकभाजने
मधुमष्याऽतिविविक्तवर्णया ।
प्रणयस्य रहस्यमीदृशं
प्रहितं सर्वमिदं त्वदन्तिके ॥३२०॥

रुदती रुदती वृथैव रे
कुररि त्वं म्रियसे वनावनौ ।
रुदितं विनिशम्य ते पुन-
र्नहि वाल्मीकिरुपैष्यति क्षणम् ॥३२१॥

स्मयमानमुखाः क्षणावधौ
ननु सर्वेऽपि यथागतं गताः ।
मम सख्यमिह प्रकल्पितं
स्थिरमेकाकितयैव तन्मया ॥३२२॥

न मया बत तुभ्यमर्पिता
निजकार्तघ्न्यसमन्विता नतिः ।
विधिना वद केन मेऽधुना
भविता निस्तरणं गते त्वयि ॥३२३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

इह नामिलदेव नामिलत्
स जनो नामिलदेव यस्य रे।
निकटे स्वगतं निवेद्य त-
त्क्षणमेषोऽहमवाप्नुयां शमम् ॥३२४॥

पठितं सुबहु श्रुतं बहु
स्वनुभूतञ्च बहु, स्वहृद्गतम्।
अनिवेदितमेव तिष्ठती-
ति निवेद्यैष पुरः स्थितोऽस्मि ते ॥३२५॥

अतिमात्ररहस्यविज्ञनो-
ऽपि रहस्यं नहि वेद यत्किल।
मधु तन्मम रिक्तभाजने
निहितं स्वेन करेण रे त्वया ॥३२६॥

घटनावशतः सुदूरगो-
ऽपि दवीयान् भवतीह कश्चन।
हृदयं बत तस्य किन्त्वहो
निकटस्थस्य सुदूरतः स्थितम् ॥३२७॥

सुखमित्युदगाद् भ्रमो ममा-
पि हृदि प्रागवलोक्य सर्वथा।
अधुना तु गतभ्रमोऽभवं
सकलं दुःखमिति प्रकल्प्य रे ॥३२८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

वत गर्तगतं समुद्धरेत्
क इतो मां त्वदृते शुचिस्मिते ।
हसतीह विवेकहीनतां
मम विज्ञाय जनस्तु सर्वतः ॥३२९॥

वचसा तव नाम कस्यचिद्
हृदयं चेत् प्रविदीर्णमेकदा ।
तव वाग्मितया सुजातया
तव मूकत्वमरे वरं, वरम् ॥३३०॥

जगतो विषमस्य सन्ततां
मधुरां चापि कर्तुं स्मृतिं मलम् ।
तव रूपपयोनिषेकतो
हृदयादस्म्यपनेतुमुत्सुकः ॥३३१॥

निजचेतसि यच्च चिन्तय-
स्यथ यद् वा विदधासि तच्च तत् ।
तव कृत्यमहर्निशं स्थितः
स हि नेपथ्यगतोऽपि पश्यति ॥३३२॥

तव रूपमिति प्रकल्प्य य-
च्चिरकालाद् व्यथितोऽभवं तथा ।
मम हन्त तदेव रूपमि-
त्यधिगत्याद्य गतभ्रमोऽस्मि रे ॥३३३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

विहसन् विहसन् भवेत् सदा
ननु यः सोऽपि कदाचिदग्रतः।
प्रहसन् यदि चेद् भवेत् क्षणं
प्रविलोक्येयत्यनुभूयते व्यथा ॥३३४॥

यदयं निहितस्त्वया मयि
स्वभरः कश्चन तेन हेतुना।
चलितोऽस्मि पथि स्खलन्नतो
मम भारं खलु निर्वह स्वयम् ॥३३५॥

तव रे मधुसागरादहं
पृषदेकं किमपीह कामये।
तव तस्य न दानतः क्षतिः
सफलं जीवनमेव मे भवेत् ॥३३६॥

त्वरितं पवन त्वयाऽऽत्मना
न तदुद्यानमितः प्रवेक्ष्यसि।
मृदुला कुसुमावली तदा
शयिता कण्टकिता वृथा भवेत् ॥३३७॥

कलिकासु सुकोमलासु न
क्षतिरस्त्वीषदपीति चिन्तयन्।
प्रविशोपवनं शनैः शनै-
रिदमुद्यानजनस्तदाऽऽह माम् ॥३३८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

सुरभेर्विगतस्य मां स्मृति-
बत मथ्नाति मुहुः क्षणस्य रे।
परिपीतमलं पिपासुना
तव यस्मिन् हि मया मधुस्मितम् ॥३३९॥

बहवो मयि सन्ति रावणा
मयि रामोऽपि विराजते कवे।
वचनैः शिवसत्यसुन्दरै-
रलमुद्बोधय राममेव रे ॥३४०॥

तव किञ्चिदुदग्रतारकै-
रहमुद्भ्रान्त इवावलोकितैः।
समुपेत इह त्वदन्तिकं
न मतं वक्तुमशक्नुवं निजम् ॥३४१॥

बहवो दिवसा नु यापिता
व्यथितेनेह मया प्रतीक्ष्यसे।
भवनाटकसूत्रधार हे
निजनेपथ्यगृहाद् विनिःसर ॥३४२॥

मम युद्धमिह प्रवर्तते
स्वकुरुक्षेत्रमिदं हि जीवनम्।
विजयस्तु तवैव हस्तयो-
र्मम भाग्ये लिखितः पराजयः ॥३४३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

न बलं मयि निर्बलोऽस्म्यहं
त्वमसि त्वं मम केवलं बलम् ।
यदि मां पुनरप्युपेक्षसेऽ-
नवलम्बो निपताम्यहं पुनः ॥३४४॥

कलहस्य न तेन कश्चना-
वसरो येन सहागतेन मे ।
चषकोऽपहृतः पिपासुनै-
व मया नीतमथापि नेष्यते ॥३४५॥

भणितं मम मौनमित्यहो
यदनर्थान्तरमित्युभे अपि ।
मधु किञ्च तया निवेदितं
किमपि स्वञ्च मया निवेदितम् ॥३४६॥

इह यस्य नु जीवनं व्यथा
व्यथया तस्य किमेव पृष्टया ।
व्यथिता इतरेऽपि पृच्छ तान्
न नगण्यस्य हि गण्यते व्यथा ॥३४७॥

निजशर्म विशीर्णतां गतं
विपदः कुज्झटिका प्ररोहति ।
मम दुःखमिदं न केवलं
सकलोऽपीह जनो विषीदति ॥३४८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

भवतां विदितं हि पीडय-
त्यधिकं हन्त कठोर आतपः।
परितप्तमनातपेऽपि मां
क इह स्निग्धजनः शमं नयेत् ॥३४९॥

हसितं रुदितं ममाधुना
गतमेवैकपदे विलीनताम्।
मधुदानपरायणा दृशं
मयि यस्मिन् कृतवत्यसौ क्षणे ॥३५०॥

मम पात्रमपात्रमेव चे-
न्मधुनस्ते यदि जीर्णतां गतम्।
चषके निज एव नूतने
मधु चेत् स्निह्यसि मह्यमर्पय ॥३५१॥

इह मां तव मन्दिराजिरा-
कृतमुत्पश्यतु को हि दुर्गतम्।
दयसे नु कदाचिदाश्रिते
त्वमिति द्वारि पुनस्तव स्थितः ॥३५२॥

प्रसमीक्ष्य दृशं तवाधुना
करुणाभावतरङ्गितां मुहुः।
शिथिलीभवतीव साम्प्रतं
पुरतस्ते मदयाचितव्रतम् ॥३५३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

कुरु साम्प्रतमग्निसादिदं
द्रुतमस्तित्वमिदं मम व्रणम् ।
फलितं किमनेन तिष्ठता
न च देवाय न पित्र एव वा ॥३५४॥

हृदयं मम चित्रकूटतां
नय तत्राभिरमस्व नीतया ।
सततं सममेव सीतया
मम हे राम मम प्रियाधिक ॥३५५॥

मम दुःखनिवेदनं द्रुतं
किमपि त्वां विदधीत नैव चेत् ।
बहुभिः स्वविजल्पितैस्त्रपे
ननु तस्मान्मम मौनिता वरम् ॥३५६॥

मधुदानमधीनमीहिते
ननु तस्यैव कठोरचेतसः ।
विदितं वद केन तत्पुरा
यदसौ दित्सति वा न दित्सति ॥३५७॥

मधुनोऽधिगमाय कैश्चिद-
प्यतिमात्रं चतुरैः प्रयत्यते ।
समवाप्यत एव सर्वथा
निरुपायैरिदमीक्षितं मया ॥३५८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

स्वयमेव पथि भ्रमं गता
मम पन्थानमिहादिशन्त्यमी।
मयि गर्तगते न सम्प्रति
द्रुतमुद्धर्तुमुपैति कश्चन ॥३५९॥

दयसे त्वमकिञ्चनेषु यद्
बहुशो नाम मया श्रुतं जनात्।
मदकिञ्चनतामरुस्थली
चिरमाकाङ्क्षति ते दयाघनम् ॥३६०॥

इदमात्मनिवेदनं नु मे
रुधिराश्रूणि विमोचयेदपि।
त्वयि मीलितदृश्युपेक्षया
क्षणमित्थं प्रतिकूलतां गते ॥३६१॥

विनिवारित एष सर्वत-
स्तव गेहं समुपेतवानहम्।
त्वमपीह निवारयस्यहो
कुत एतर्हि वद व्रजाम्यहम् ॥३६२॥

विनिवेदयितुं निजामहं
नहि काङ्क्षे जनसंसदि स्पृहाम्।
पृथगेव पृथग्जनोपम-
स्तव सङ्केतवशीकृतः स्थितः ॥३६३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

श्रुतिरस्तु कुराणमस्तु वा-
　　ऽप्यथवा बाइबिलं गुरोर्गिरः ।
नहि तेषु विवाद एष मे
　　सकलस्तन्मुरलीमधुध्वनिः ॥३६४॥

उररीक्रियते न केवलं
　　तव रे काचन चन्द्रिका मया ।
शिरसा प्रणतेन धार्यते
　　स्वललाटन्तप आतपस्तव ॥३६५॥

तव नाम किमुत्तरं भवेत्
　　सुगृहीतस्य हठस्य साम्प्रतम् ।
उपशाम्यति यो न हृद्गतो
　　विहितैर्यत्नशतैरपि क्षणम् ॥३६६॥

तव चेतसि न स्थितिं लभे
　　बत मच्चेतसि नासि च स्थिता ।
इति दूरसुदूरभावना-
　　स्वपि जायेत कथं समन्वयः ॥३६७॥

समये प्रतिकूलतां गते
　　सुहृदोऽपि प्रतिकूलतां गताः ।
मम कण्टक एव कण्टकः
　　कुसुमं कण्टकतां गतं मम ॥३६८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

विफलत्वमिदं हि मे तदा
सफलत्वं समवाप्नुयाद् यदा ।
क्षणदक्षण एष तावक-
स्तृणकल्पे मयि पावकः पतेत् ॥३६९॥

सुविशालतरे त्वयीह वा
मम रे क्षुद्रतरस्य का गतिः ।
तदपि त्वमुपेक्षसे न मां
जयतीह त्वदुदारता ह्यसौ ॥३७०॥

चतुरत्वमिहास्ति साधनं
मधुलाभाय हि नैव नैव रे ।
चतुरः सकलो निराशतां
लभते तन्मधु नैव विन्दति ॥३७१॥

सहजैव पिपासुता हृदो
मधुलाभे भवतीह साधनम् ।
बहवो मधुपानलोलुपा
इत एतर्हि तया निराकृताः ॥३७२॥

उदयं हृदये तव व्रजेद्
यदि मे लुण्ठितसम्पदः स्मृतिः ।
क्षणमेकमरे स्मितं ततो
मुखपद्मे तव किं परिस्फुरेत् ॥३७३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

अधुनेह दयोन्मुखा मनाङ्
मधुपायिन्यभिलक्षिता मया ।
स समुद्रमितो नु याचतां
पृषदभ्यर्थितमस्ति यस्य रे ॥३७४॥

सकलस्य सदा भवेदितः
कलसङ्गीतमयं नु जीवनम् ।
न ममेव भवेच्च कस्यचिद्
व्यथया नीरवयेह पूरितम् ॥३७५॥

विनिवेदयितुं न शक्नुयां
यदि नाम स्वमनोरथं गिरा ।
कलयेस्त्वमवश्यमेव तं
मम किञ्चित् स्थिरयाऽऽर्द्रया दृशा ॥३७६॥

घटते क्वचिदेव कस्यचि-
न्ननु केनापि समं समन्वयः ।
बहुभिर्बहवोऽन्यथा क्व वा
न मिलन्त्येव जनैर्जना इतः ॥३७७॥

विरतोऽहमपात्रतां निजां
मधुलाभे परिकल्प्य यावता ।
समुपागतमेव तावतै-
व तदीयं त्वनुकूलमिङ्गितम् ॥३७८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

विनिवेदयिता क एव मां
जनसम्मर्द उपस्थितं तदा ।
त्वमुपेत्य यदा स्वपाणिना
मधु सर्वेभ्य उपाहरिष्यसि ॥३७९॥

निजभारमहं समर्प्य यत्
त्वयि निश्चिन्त इवासमात्मना ।
विदधाति तु सैव मां स्थिति-
र्नतमाभारभरेण साम्प्रतम् ॥३८०॥

कुसुमस्रगियं करस्थिता
मम न म्लानिमुपैतु साम्प्रतम् ।
तव कण्ठगतां विधाय तां
स्वमहं सार्थकतां नयानि किम् ॥३८१॥

कुसुमाङ्कुरणं तु दूरतो-
ऽस्म्यहमुत्पीडित एष कण्टकैः ।
अधुना मधुबन्धुनाऽपि मे
न वसन्तेन विचार्यते व्यथा ॥३८२॥

सुतरां त्वदधीनतां गतः
कथमप्येष जनो न निर्वृतिम् ।
भजते यदि ते दयालुता
क्व पुनः सार्थकतां गमिष्यति ॥३८३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

पदयोर्ननु तस्य गुम्फिताः
सकला नूपुरवत् क्षणा मया ।
मम भाग्यविपर्ययात् ततो-
ऽपि च ते मौनमिवाश्रिता भृशम् ॥३८४॥

परिहासविजल्पितानि रे
नहि सोढानि कियन्ति ते मया ।
मम जल्पितकेन सम्प्रति
व्यथिताऽसीति ममैव दुर्विधिः ॥३८५॥

वचनीयतया तदा मम
स्वजनो मौनमिवावलम्बिता ।
पुरतस्त्वदुपस्थिताविमां
स्वपिपासां परिभावयाम्यहम् ॥३८६॥

त्वदनुग्रहसङ्गतामिमां
स्वपिपासां परिभावयाम्यहम् ।
फलमेतदहो महन्मया
मधुलाभादपि लब्धमात्मना ॥३८७॥

न नियन्तुमशक्नुवन् जनं
यमिमा आयसशृङ्खला अपि ।
स निबद्ध इहावतिष्ठते
मृदुरज्ज्वा प्रणयाख्यया भुवि ॥३८८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

इह नाकलितं मयाऽधुना
निजमाकाङ्क्षितमेव सर्वथा ।
मधुलाभत एवमुद्गता
स्वपिपासैव मताधिकं मम ॥३८९॥

गमनं विनिवार्य लोचने
मम पार्श्वात् तव रे पुनः पुनः ।
मयि सम्प्रति कामपि व्यथां
जनयत्येतदिदं न वेत्सि किम् ॥३९०॥

मृदुना स्तनितेन केवलं
बहुशो वञ्चयसि त्वमम्बुद ।
इह दृष्टिरपेक्ष्यते तव
स्तनितं साम्प्रतमस्त्यसाम्प्रतम् ॥३९१॥

क्व पुराणमपैति वा कुतो
नवमायाति न जानते जनाः ।
अहमित्यहमित्यनारतं
स्थिरतां स्वामियताऽपि चक्षते ॥३९२॥

निजचित्तनभोऽङ्गणे मया
तव कारुण्यघनः प्रतीक्ष्यते ।
परितापकरो महानयं
तपति ग्रीष्म इमं शमं नय ॥३९३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

न सुखाय विचेष्टितं सुखा-
घिकलाभाय न च प्रतीक्षितम् ।
तदपि स्मृतया किमेष रे
करवाणीह न रुध्यते क्षणम् ॥३९४॥

रुदिताद् विरतं विधाय मां
हसितादप्यथ वारयस्यहो ।
किमिदं मयि ते विचेष्टितं
प्रभवेदप्यनुकूलमन्ततः ॥३९५॥

अहमेव न केवलं ब्रुवे
ब्रुवते सर्व उपस्थिता इह ।
यदिदं मधुदानमीहया
निजया नैव प्रवर्तितं त्वया ॥३९६॥

बहुविघ्नमभूत् पुरा कदा-
चिदिदं मे मधुपानमीदृशम् ।
तव नैव तु सर्वथा त्रुटि-
र्मदभाग्यं जयतीह केवलम् ॥३९७॥

न यदर्पितवान् न तत्कृते
मम खेदः परमत्र खिद्यते ।
उपहृत्य गृहीतवानसि
क्व तवेयं हि विधे विडम्बना ॥३९८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

न सरोवरतां तवोत्तमा-
मभिलक्ष्यात्र विवाद एष मे।
मम पल्वलताऽपि न स्थितिं
लभते त्वद्दृशि खेद एष मे ॥३९९॥

सकलेऽपि समन्ततो ध्वना-
वुपशान्ते निशि यो नु केवलः।
मनसीह रहोगतस्य मे
तव जागर्ति स कश्चन ध्वनिः ॥४००॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

पञ्चमं शतकम्

अतिगूढरहस्यमित्यदो
न मयोद्घाटितमन्यसन्निधौ ।
कतिचित्तदपीह तावका
मयि दोषं विनिपातयन्त्यमी ॥४०१॥

सुकृतस्य कृतस्य किं फलं
ननु मे पूर्वतरस्य जन्मनः ।
फलितस्तदनुग्रहोऽथवा
यदियं नाम पिपासुता मम ॥४०२॥

इह तिष्ठ सुधामहानदी
समुपैतीति मुहुस्त्वयोदितम् ।
तत एव पिपासया म्रिये
समभूद् वारिकणोऽपि दुर्लभः ॥४०३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

यद्किञ्चनकेऽपि मय्यहो
भवतां चेतसि काचिदार्द्रता ।
तदियं हि पुरस्कृतिर्मता
न पुरस्कार इतोऽधिकः परः ॥४०४॥

तव कार्म्यपि दृष्टिमात्मनि
स्फुरदार्द्रत्वगुणामिव श्रितः ।
दिवसान् विरसानमूनहं
विनिनीषामि हसन् प्रतिक्षणम् ॥४०५॥

न मनागपि चिन्त्यते मया
परिणामश्चलता पथाऽमुना ।
सुतरामधिकार ईदृशो
निगृहीतो यदिह त्वयाऽऽत्मना ॥४०६॥

प्रतिकूल इहाभवद् दिना-
तप एवं नहि तेन खिद्यते ।
मम खेद इयांस्तु चन्द्रिका-
ऽप्यधुना मत्प्रतिकूलतां गता ॥४०७॥

अहमेष गवेषयन्नपि
स्वहृदि त्वां न कथञ्चिदाप्नुवम् ।
मम सन्निकटे तु सन्ततं
सुरभिस्त्वद्वपुषोऽवतिष्ठते ॥४०८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

कथने मनसि स्थितस्य मे
नहि विश्वास इहोपजायते ।
मयि किञ्चन मौनिताजुषि
स्फुटतामेति विशिष्य हृद्गतम् ॥४०९॥

तव हस्तगतं सुधाघटं
न मनो हस्तयितुं मया कृतम् ।
तदपि ग्रहणाय मत्करा-
ज्जलपात्रस्य विचेष्टितं त्वया ॥४१०॥

नहि झङ्कृतयो न मूर्च्छना
न च रागो न च गीतिवेल्लितम् ।
मयि वाद्यविशेष ईदृशं
विकटं मौनमिदं विराजते ॥४११॥

समयः क्व सरित्प्रवाहवत्
प्रविदूरे प्रविलीयते स्थले ।
तटवर्ति मदीयमुच्चकै-
रिदमस्तित्वमहो विषीदति ॥४१२॥

अवसादमिमं मनोगतं
किमपि त्वां विनिवेदयामि वा ।
किमनेन निवेदितेन वा
त्वयि संश्रुत्य च नैव शृण्वति ॥४१३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

यदि वर्षसि वर्ष सर्वथा
कुसुमोद्यानगणेषु वारिद ।
यदनातपतोऽपि मां मरुं
सुतरां वञ्चयसीति खिद्यते ॥४१४॥

तव नैव सहानुभूतयोऽ-
प्युपचाराय न चेष्टसे ततः ।
कथमेव निजैर्नखैर्व्रणं
निजकं हन्त विदारयाम्यहम् ॥४१५॥

अतिमात्रमिदं विगर्हितं
मधुपानं बहुभिर्महाजनैः ।
क्वचिदत्र नु तैः पिपासुता-
प्रशमोपाय इह प्रदर्शितः ॥४१६॥

उदियात् सकलेऽपि जीवने
यदियं नाम पिपासुता मम ।
मधुने क इहोद्यमो भवेत्
तदहोभाग्यमितः फलेदिव ॥४१७॥

क्षणमाकलितं यदि त्वया
मितमेवोक्तमिदं नु सार्थकम् ।
किमपि श्रुतमेव न त्वया
यदि तद् व्यर्थमहो बहूदितम् ॥४१८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

न हसेन्न हसेत्स हि क्षणं
रुदितं यत्प्रकृतिर्नु वर्तते।
इति मामवलोकयन्नुपे-
क्षितकेनाद्य सुहृत्तमो गतः ॥४१९॥

तमसा क्षुधितेन खादितो
ननु सूर्यः सकलोऽपि साम्प्रतम्।
किरणान् कमिवेह याचसे
किरणानामिह कल्पना वृथा ॥४२०॥

शृणुयाज्जन आगतो नु मा-
मिदमुद्दिश्य न चेष्टितं मम।
इह सान्त्वयितुं समाकुलं
स्वमनश्चेष्टितमेतदस्ति मे ॥४२१॥

विचराणि कियन्मराविहा-
तिकठोरे ह्यतिमात्रनीरसे।
तव रे मधुशालिकापथं
यदहं भ्रान्त इतो गवेषयन् ॥४२२॥

तव यावदुपेतवानहं
प्रथिते द्वारि पिपासयाऽन्वितः।
मधु तत्र समर्प्य निर्गता-
स्त्वमभूस्तावदुपागतेभ्य आः ॥४२३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

निपपात न यत्र चन्द्रिका
न ववर्षाम्बुदमण्डली यतः ।
मरुरस्मि स दुर्गतः फलं
किमितो मत्सदृशेन तिष्ठता ॥४२४॥

न फलानि यतो न चाप्यना-
तप एवं सुलभः क्षणं यतः ।
पथिकाः ! पथि पार्श्ववर्तिनं
कुरुत स्थाणुमुदग्रमग्निसात् ॥४२५॥

मम हन्त प्रतीक्षया स्थितं
त्वदयोगे ननु यातयामया ।
इयताऽपि न ते विचेष्टितं
प्रतिकूलत्वमिदं विमुञ्चति ॥४२६॥

जगदस्ति मृषेति भाषयो-
पदिशद्भिर्बहुभिर्नु धार्मिकैः ।
जगतः परिभुज्यते सुखं
विनिवार्येह बहूनजानतः ॥४२७॥

हसितस्य मम क्षणास्त्वया-
ऽपहृतास्तेन न काऽपि मे क्षतिः ।
रुदितावसरेषु सन्निधीन्
कथमेवाश्रुकणान् जिहीर्षसि ॥४२८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मधुभावनयाऽपि सन्ततं
मधुपत्वं प्रतिपद्यते जनः ।
किमु तस्य य एव सर्वदा
मधुशालां पिबति श्रितो मधु ॥४२९॥

सुहृदामभिकाङ्क्षितं ममा-
पि मनःशीलितमेतदीहितम् ।
लसदाम्रवणे सरित्तटे
क्वचिदेका मधुनः प्रपा भवेत् ॥४३०॥

इदमत्र मदीयमानसं
व्यथितं नाम कथं न तिष्ठतु ।
तव सत्प्रणयाख्यमम्बुजं
न समुत्पद्यत एव यावता ॥४३१॥

मम वाद्यजडस्य साम्प्रतं
हृदयाख्यस्य गतस्य मूकताम् ।
क इहानयतु त्वदङ्गुले-
र्मृदुसंस्पर्शसुखैकचेतनाम् ॥४३२॥

स्वन मा पिक ते कुहूरवै-
र्हृदयं मामकमुद्व्रजत्यदः ।
शतधेदमहो भिनत्ति चेत्
स्वनितासि त्वमरे पुनः पुनः ॥४३३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

क्रियते न कथं समन्वितं
स्मितमेतै रुदितस्य लक्षणे ।
बहुधा रुदितं बुधैरपि
स्फुरितेनाश्रुकणेन कल्प्यते ॥४३४॥

भवितास्मि विदां सदःसु रे
परिहासस्य विशिष्य गोचरः ।
प्रणयात् किमु जीवनादहं
विरतः स्यां वदतोपदेशकाः ॥४३५॥

यदमानि मयाऽभिमानिना
मधुलाभः फलमात्मनो मतम् ।
अभिमान इतः क्षणे मम
प्रविलीनः समभूच्च वाष्पवत् ॥४३६॥

मनसः किमियं त्वरा मम
प्रशमं यास्यति वा न वाऽधुना ।
मम पूर्वमुपस्थितेः क्षणा-
दवरुद्धेह मधुप्रपाऽभवत् ॥४३७॥

विरतेस्तव नाम वर्त्मनः
क इव प्रश्न उदेति साम्प्रतम् ।
विरमेति यदि त्वया दृशो-
रथ सङ्केत इतो न दीयते ॥४३८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

तव नाम कियद्भिरीक्षितं
सहजं किञ्च मधु स्मितं कलि ।
हतभाग्यमिदं विकासतो-
ऽधिगता पूर्वमरे विकीर्णताम् ॥४३९॥

नहि यत्र पिकध्वनिः श्रुतः
कृतनीडा निवसन्ति वायसाः ।
श्वमुखाः पशवश्च शेरते
न तदुद्यानमरण्यमेव तत् ॥४४०॥

बहुभिः कविभिर्निरीक्ष्य त-
न्मुखकान्तिर्मुखरैर्नु वर्णिता ।
मम वागभवत्तु तत्क्षणं
प्रविकीर्णेव च कुण्ठितेव च ॥४४१॥

न पिपासुरुपैति यत्र वा
न च विश्राम्यति यत्र दूरगः ।
प्रपया न तया प्रयोजनं
न तदुद्यानमपेक्ष्यते भुवि ॥४४२॥

कुटिलानि तदिङ्गितान्यपि
क्षणमायान्ति ममानुकूलताम् ।
मधु मद्यपके निधाय सा
त्वरते पाययितुं स्वपाणिना ॥४४३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

हृदि पूर्वमियं पिपासुता
तव चेज्जागरिता भविष्यति।
स्वयमेव ततो मधुप्रपा
तव रे सन्निकटे भविष्यति ॥४४४॥

विनिवारितमप्युपैत्यदो
रहसि त्वां कथमेव मन्मनः।
हठमस्य शिशोरिवाधुना
विधिना केन निवर्तयेयमाः ॥४४५॥

व्यथितस्य निराकृतस्य मे
भुवि कः स्याच्छरणं सुहृज्जनः।
शिथिला तव दीनबन्धुता
नहि चेत् स्वीकुरु मां दयानिधे ॥४४६॥

तव दृष्टिविशेषलाभतो-
ऽप्यधिकं लाभमहं न कल्पये।
तत एष जनः प्रिये निजः
कथमद्यावधि वञ्चितस्त्वया ॥४४७॥

शुभभावनयाऽस्मि भावितः
स्वपिपासामपि कल्पये कृपाम्।
किमतृप्त इतो भवानि वा
करुणां कामपि ते लभेय वा ॥४४८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

विनिवर्तितुमुद्यतोऽभवं
निरुपायं स्वमवेत्य यावता ।
त्वमुपेत्य नु तावतैव म-
च्चषकं पूरितवत्यतित्वरा ॥४४९॥

दर एष ममोपजायते
प्रकटीकुर्वत आदरं त्वयि ।
गणयेरपिपासुमेव मां
कुतुकेन क्षणमागतं प्रपाम् ॥४५०॥

इह खेदकरं परं न मां
पर इत्याहुरमी परे यदा ।
स्वजना ब्रुवते यदेदृशं
व्यथयत्येतदतीव मां तदा ॥४५१॥

न सुधाम्बुधये विचेष्टितं
पदलाभाय न चेष्टितं दिवि ।
स्वमकिञ्चनमुद्धृतो भवा-
न्युपहृत्येति मया विचेष्टितम् ॥४५२॥

तदनागमनं वरं मतं
नहि यस्यागमनं प्रतीक्षितम् ।
वरमेव हि तस्य मौनिता
भणितिर्यस्य मुदे न चेतसः ॥४५३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

किमपीह विधेयमित्यरे
त्वदुपान्ते हि मयैतदर्थितम् ।
विदितं किमु नैतदन्यथा
मम न श्रोतुमिदं व्रतं तव ॥४५४॥

नगराणि हसन्ति निर्भरं
किरणैः सम्प्रसृतैरिवैकतः ।
इह मूक इव स्थितोऽन्यत-
स्तमसि ग्रामचयस्तु रोदिति ॥४५५॥

पिबतोऽपि पिपासुता यदा
क्रमशो वर्धत एव चेद् यदि ।
मधुना सकलेऽपि जीवने
मम रे वञ्चितकस्य का कथा ॥४५६॥

अतिमात्रमधिप्रपं त्वरा
लघुतायाः परमेव साधिका ।
मधुनोऽवसरे पिपासुभिः
सततं धैर्यमिवावलम्ब्यते ॥४५७॥

गमनाय मया विधेर्वशा-
दिह मार्गः समुपाश्रितो यतः ।
स्वजना न मिलन्ति नैव वा
तरवो नैव च नैव गेहकाः ॥४५८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

भवति प्रतिकूलतां गते
कथमप्यत्र मया हि यापितम् ।
प्रखरातपतापिते यथा
पथि दुःखं पथिकेन गम्यते ॥४५९॥

तव हन्त कृपाघनावली
ह्यपदे चासमयेऽपि वर्षति ।
परितापविशीर्णमेव मां
कथमेषा नितरामुपेक्षते ॥४६०॥

महताऽपि यमेन न क्वचि-
न्मधुलाभः सरलोऽपि सिध्यति ।
स्वयमेव कदाचिदात्मनः
पुरतो नाम मधूपतिष्ठति ॥४६१॥

क उपाय इतो विधीयता-
मधुना तन्मधुलिप्सुना मया ।
विफलत्वमवाप मामकः
सकलो यत्न इतोऽथवा ततः ॥४६२॥

न कुतोऽपि पलायितस्य रे
प्रशमः सम्भविता कृते तव ।
अत एव निमील्य लोचने
निगडं स्वीकुरु तिष्ठ सद्मनि ॥४६३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

इह हन्त शयानमध्वनि
प्रसभं जागरयेत् स मां जनः ।
इति विश्वसितं मया पुनः
स गतो दूरमितो विहाय माम् ॥४६४॥

मधुपानमिदं प्रवर्ततां
तव रे किञ्चन जीवितावधि ।
इति सम्प्रति किञ्चिदाशिषा
त्वमुदारे ननु मामपूरयः ॥४६५॥

मुखरत्वमिह स्थिता जना-
स्तव शंसन्ति नु मौनभाषया ।
मम मौनमिमे पुनः पुन-
र्बत निन्दन्त्यमितैर्वचोभरैः ॥४६६॥

विहसन्तमवेक्ष्य मां कदा-
चिदुवाचाधिकविस्मितः सुहृत् ।
रुदितस्य क एष भङ्गिमा
ननु सम्प्रत्यवलम्बितस्त्वया ॥४६७॥

त्यजत स्वपरेतिभावनां
मधुनस्तिष्ठत रे प्रतीक्षया ।
इयमस्ति मधुप्रपा तत-
श्चषकान् शोधयत द्रुतं निजान् ॥४६८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

प्रतिभान्ति सुदूरपूर्वतो
दिशि रे साम्प्रतमुद्गतास्त्विषः ।
स्वकरे कुरुत स्वकानिमां-
श्चषकान् मध्वघुनोपतिष्ठति ॥४६९॥

तमसा न बधान मां तथा
मम मैत्रीं किरणैर्न योजय ।
अतिमात्रनिराशतां गतो
द्वितयेनाप्यमुनाऽस्मि पीडितः ॥४७०॥

व्यथितोऽस्म्यनुमाय साम्प्रतं
त्वदनास्थामतिमात्रमात्मनि ।
यदसत्यमिति त्वया वचो
मम नाकर्णितमानतास्यया ॥४७१॥

यदि मामुदिताऽपि तर्पये-
न्न घनश्याम तवेयमार्द्रता ।
फलितं किमनेन जन्मना
तदितः प्रस्तरतैव मे वरम् ॥४७२॥

रमयन्ति मनो न गीतका-
दिकलाः सुस्वरवर्णमण्डिताः ।
मरुतां गतमेतदत्र को-
ऽपि न रागो न रसो न चेतना ॥४७३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

कथमेव नहि त्वदग्रतः
प्रसरेतामपि मत्कराविमौ ।
मदयाचितकव्रतस्य रे
कियता स्यादथवा परीक्षणम् ॥४७४॥

उपलब्धमिदं विधेर्वशा-
न्न मुदे जीवितमात्मनोऽभवत् ।
वद कस्य हिताय जायतां
चिरधूमायितमेतदन्ततः ॥४७५॥

विगलेत् तव पादयोः क्वचित्
क्षणमस्तित्वमिदं मदीयकम् ।
इह जीवन एतदीहितं
मम किं सेत्स्यति वा न सेत्स्यति ॥४७६॥

स्वयमावृणु वा स्वमाननं
स्थगय स्वामथवा मधुप्रपाम् ।
अधुना मधुनः पिपासुभि-
स्तव सङ्केत इतोऽवधारितः ॥४७७॥

जलदत्वमिहास्ति सार्थकं
वद मेघस्य कियन्नु तस्य वा ।
उदयेन तु यस्य न क्षणं
विरता हन्त तृषाऽभवद् भुवः ॥४७८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

महतां सरसामपेक्षितं
कृतकृत्यो न भवेर्हि साधयन् ।
जलद त्वदुदारताऽफला
तृषिते तिष्ठति नीचकूपके ॥४७९॥

विरतोऽहमितोऽपि धावना-
द्भवं ते न गवेषणक्रमे ।
जनितः पदयोर्मसाधुना
न कियान् स्फोटगणः प्रसीद रे ॥४८०॥

यदि तस्य कथञ्चिदेव वा
न मदस्तित्वमिदं मुदेऽभवत् ।
शतधा विहितेन हन्त मे
हृदयेनापि मिलेन्नु किं फलम् ॥४८१॥

अधुना विनिवार्यतामियं
मधु पास्यामि न हन्त तत्करात् ।
नियमादधिकं निपीय को
भविताऽस्मिन्ननयस्य भाजनम् ॥४८२॥

बहवो विहसन्ति कण्टकाः
सुमनांसि प्ररुदन्ति तत्र किम् ।
अवलोकयतोऽपि वाटिकां
तव मौनं तु वरं न वाग्मिता ॥४८३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

अभिधेयमुदीरितं न वा-
ऽनभिधेये च बहु प्रजल्पितम् ।
मम चित्तमिदं दिवानिशं
चिरकालाद् व्यथयत्यसौ स्थितिः ॥४८४॥

दिवसोऽपि नु यस्य रात्रितां
समुपेतः सकलेऽपि जीवने ।
भविता नु कदा प्रभातमि-
त्यथ तस्यास्ति किमु प्रतीक्षितम् ॥४८५॥

हसितानि जना बहूनि मे
परिकीर्णासु सभासु जानते ।
रुदितानि तु तानि तानि मे
विकलं वेद हृदेव केवलम् ॥४८६॥

नगरे नगरे गृहे गृहे
क्व नु दीपावलयश्चकासति ।
तमसा मम हृत्कुटीरकं
कथमद्यावधि नैव मुच्यते ॥४८७॥

नहि सार्थकतामुपेतवां-
श्चषकस्त्वत्करपूरितोऽपि मे ।
यदिमं कर एष दुर्बलो
मम नोत्थापयितुं प्रवर्तते ॥४८८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

अहमेष समुद्यतः पुनः
स उपेयादथ साम्प्रतं पुरः ।
अनया किमितः पिपासया
पुर एतर्हि भवेद् भृशं मधु ॥४८९॥

मधुनैव कलङ्कितोऽभवं
यदितः किञ्च जगत्यहं पुनः ।
मधुनैव कलङ्कमात्मनः
सुचिरात् क्षालयितुं च कामये ॥४९०॥

समलोकि गतस्य कस्यचित्
पदचिह्नं न कुतोऽपि दूरतः ।
इह घोरजगन्मरौ भ्रमाद्
भ्रमता भीतिमता मया स्थितम् ॥४९१॥

न कियन्ति सरांसि वा नदीः
कियतीर्वा कियतोऽहमम्बुधीन् ।
शरणं गतवान् पिपासया
मिलितास्ते तु परं पिपासिताः ॥४९२॥

त्वयि चिन्तनमेव मत्कृते
विशदं किञ्चन सुप्रभातकम् ।
त्वयि कोऽपि निराशतोद्गमो
मम हन्तास्ति दिनान्तसान्ध्यकम् ॥४९३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

सहजा तु तव स्मितच्छटा
परिकीर्णा कुसुमोच्चयोऽग्रतः ।
मम कण्टकविद्धहस्तयोः
क्षणमास्थाय शमं नयेद् व्यथाम् ॥४९४॥

विधये प्रतिकूलतामितो
न गतायास्त्युचिता प्रतिक्रिया ।
इह कस्य तु कस्य जल्पतो
वदने हन्त करोऽर्पयिष्यते ॥४९५॥

इह कश्चिदतृप्त एष इ-
त्यथ को मां परिचाययेत् स्थितः ।
मधुदानपरायणाऽथं सा
स्ववशं स्वेन न चेन्निपातयेत् ॥४९६॥

मधु मध्विति यत् सहस्रशः
कथितं न श्रुतवत्यसौ तव ।
इह मौनितयेव तिष्ठ रे
चषकं पूरितमीहसे यदि ॥४९७॥

शरणं ननु मौनमेव मे
तव लावण्यसुवर्णवर्णने ।
इह वाग्व्यवहारशालिनः
प्रयतन्तामथवा निजेच्छया ॥४९८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

छलितो बहुभिर्जनैरहं
न तथा केवलया त्वयैव रे।
तदपीह निवेदयामि चेत्
त्वदभीष्टं मधु किञ्चिदाहर ॥४९९॥

इह दुःखनिवेदनं वने
रुदितं मात्रमिदं ममाभवत् ।
तव काऽपि कृपासमन्विता
दृगितोऽद्यावधि नापतत् किल ॥५००॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

षष्ठं शतकम्

मम मौनमतीव कस्यचित्
कथमुद्वेगकरं भवेदिह ।
नहि किञ्चन भावनामयी
मम वाचि श्रवणीयता यदि ॥५०१॥

जनसङ्कुलता न रोचते
न तथैकान्त इतोऽस्ति सम्मुदे ।
क्रियतां कथमेव यापनं
मम भारो भवतीव जीवनम् ॥५०२॥

नहि कश्चन मां शृणोति चे-
दधिकारादधिकं न वच्म्यहम् ।
मम वाचि भवेन्न साम्प्रतं
परिपीते मधुनीह प्रग्रहः ॥५०३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मरणं शुभमेकमेव मे
प्रतिभातीह तु जीवनादपि ।
तदनन्तरमेव तावता
स्वपिपासा फलिता भवेदसौ ॥५०४॥

समयस्य गतिं हि वेद कः
प्रतिकूलोऽप्यनुकूलतामियात् ।
मयि ते विरसे विलोचने
प्रभवेतां सरसे च कोमले ॥५०५॥

मम सद्म न हन्त जर्जरं
तव सुस्वागतभाग्यमर्हति ।
हृदयं तु तथा भवेत् परं
तव दृष्टिर्निपतेत् ततः कदा ॥५०६॥

मम वागभिलक्ष्य वर्तते
नियतं त्वां शृणु वा न वा शृणु ।
कथनं मदधीनमेकतः
श्रवणं तु त्वदधीनमन्यतः ॥५०७॥

विलिखामि बृहत्कथामिमा-
मिह दोषाढ्य इतीव मानितः ।
विरमाणि कथं स्वकार्यतो
न पठेद्वा जन एष वा पठेत् ॥५०८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

विनिगूढमपि स्वभावतः
प्रकटं त्वामभिलक्ष्य वच्म्यहम् ।
इह नाटकमात्मनः क्षणात्
सकलं संवृणु सन्निधेहि च ॥५०६॥

निकटत्वमवाप्नुयाः क्षणं
तव कैवेह दवीयसि स्थितिः ।
विरम स्वगुणप्रकाशना-
न्मम दोषान् विनिवार्य क्षणम् ॥५१०॥

करुणा जगतीतलात् तथा-
गतलोकेन समं गता सखे ।
करुणाभिनयो जनैरितः
परितो निष्करुणैः प्रवर्त्यते ॥५११॥

मम तृड्विकलस्य पश्यतो
मधुरिक्तं चषकं निरन्तरम् ।
तव दृङ्मधुमात्रसङ्गतं
क्षणसन्तर्पणमेव काङ्क्षितम् ॥५१२॥

हृदयस्य विदीर्णतां निजा-
मिह कुर्यां न वचःपरिस्फुटाम् ।
मम मौनमिदं न तामहो
अपि नो चेत् किमपि प्रकाशयेद् ॥५१३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

विनिवेदनमेतदन्ततो
मम जातं सफलं त्वदन्तिके ।
स्मितसंवलितार्द्रचक्षुषा
बत यान्त्याऽप्यहमीक्षितस्त्वया ॥५१४॥

घटते हृदयस्तरे न यत्
परितोषाय न तच्च मादृशाम् ।
बहुधा हि बहिः प्रदर्शनै-
स्छलिताः कष्टमवाप्नुमो वयम् ॥५१५॥

भगवानिह भास्करोऽधुनो-
दयते तं नमताधिकं जनाः ।
अयमागत ईश्वरालया-
न्नहि जाने किमिवाभिधास्यति ॥५१६॥

निजयैव सरागया ह्रिया
पुरतः साम्प्रतमानतोऽस्म्यहम् ।
मधुपायिनि यद्यतोऽपि न
द्रवसि त्वां दृषदं वदाम्यहम् ॥५१७॥

तव नश्यति नीडमन्ततो
भविता हन्त परिश्रमो वृथा ।
अनुभूयत उद्गता पुन-
र्बत वात्या महती रजोभरा ॥५१८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

समयः स्वरतालमेलने
सकलो मे व्यगमन्मधुस्मिते ।
अनिवेदित एव मेऽधुना
हृदि भावो व्यथितस्य तिष्ठति ॥५१९॥

न पराजयकामनाऽपि मे
न च लिप्सा विजयस्य सम्मता ।
प्रणयस्य शुभायतेरिह
व्यवहारस्तु विशिष्य काङ्क्षतः ॥५२०॥

छलनाऽपि मयोररीकृता
त्वदवाप्ता प्रणयैकसङ्गिना ।
इह यास्यति जीवितावधि
स्थिरतां ते किमियाननुग्रहः ॥५२१॥

पदचिह्नगवेषणे कथं
नहि तस्यास्त्वरितेन भूयताम् ।
मृदु तत्पदलग्ननूपुर-
क्वणितं मां विकलीकरोति चेत् ॥५२२॥

प्रणयेन मिलेत् स्वतो मिले-
ल्लघु तेनापि महन्महत् सुखम् ।
कथनेन मिलेत्तथाऽधिकं
च मिलेत् तेन तु खेद आत्मनः ॥५२३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

नियमेषु निबद्धतां वहन्
मधुपत्वं प्रतिपद्यते जनः ।
किमु तस्य य एव सर्वथा
मधुशालां पिबति श्रितो मधु ॥५२४॥

न कृतेऽस्य शरीरकस्य रे
प्रणयोऽध्वाऽयमपेक्षितो मया ।
चलितस्य यतस्तु कण्टकै-
श्चरणौ मे क्षतविक्षतौ किल ॥५२५॥

परिचेतुमपि क्षणं त्वया
नहि निक्षिप्तमपीक्षितं मयि ।
समभूत् क्षणमप्सु मज्जतः
क्षणमुन्मज्जत एव मे स्थितिः ॥५२६॥

वसनान्तरिता अपि त्वणं
पदयोरङ्गुलयस्तवेक्षिताः ।
इयतैव हि सिद्धिरात्मनो
न कृपा स्यादिह ते ततोऽधिका ॥५२७॥

सहजाऽपि तव स्मितोज्ज्वला
कलनेयं सरसे मुखाकृतेः ।
मदनस्य धनुर्वदानता
नतवक्त्रे मयि वक्रतां गता ॥५२८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मम चेतसि कामपीदृशीं
न मधोः प्रेत्य हे सुहृत् स्मृतिम् ।
इह जर्जरिते मरुस्थले
ह्यपराधः कुसुमस्य कल्पना ॥५२९॥

जडकाष्ठचयेषु सर्वथा
न जगन्नाथमिमं बधान रे ।
क्वचिदम्बुकणोऽम्बुधिर्महान्
विनियन्तुं जगतीह शक्यते ॥५३०॥

कति सन्ति पिपासवः स्थिता
बहिरेत्य स्वयमेव पश्य रे ।
तव रोषभिया तृषान्विता
नहि कोलाहलमद्य कुर्वते ॥५३१॥

समुदीत इतो मम क्रमे
कथमेषा तव बद्धमुष्टिता ।
तव हन्त कृपाकठोरता-
मभिलक्ष्य त्वभिधीयसेऽधुना ॥५३२॥

मदुदीरितमेतदर्पितं
तव लावण्यविशेषवर्णने ।
इह सार्थकतामियात् ततो
वरमेतन्ननु मौनमन्यथा ॥५३३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

कथमेव निवार्यतामयं
परिवादो हि जनेषु मूलतः ।
अवलोक्य च मां विहस्य च
त्वमगा दूरत एव वर्त्मनि ॥५३४॥

क्वचिदेव विधेरनुग्रहाद्
बत सिध्यन्ति मनोरथा नृणाम् ।
घटितोऽपि परस्परं न यत्
प्रणयोऽभूत् फलवानिहावयोः ॥५३५॥

विवृताननयेव भूयते
स्वयमेकाकितया मदीयया ।
तदुपान्तगतं विषीदती-
व मदस्तित्वमिदं विमोहितम् ॥५३६॥

अथ पारमुपैतु मध्यतो
विनिमज्जत्वथ वा न चिन्त्यते ।
निजनौरियमर्पिता मया
तव हस्ते कुरु यद् यदिच्छसि ॥५३७॥

परिचेष्यसि ये यथा हि तान्
स्वयमेव त्वमवेदय पायिनः ।
तृषितेषु तृषां च जाग्रतीं
क इव त्वामपहाय लक्षयेत् ॥५३८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

न कदाचिदसत्यभाषणं
प्रकृतिः कस्यचिदस्ति पायिनः ।
यदि नाम न कोऽपि दुर्मति-
स्तृषितेष्वेषु निलीय तिष्ठति ॥५३९॥

प्रतिकूलविधिप्रवर्तिते
समये क्वासि विहाय मां गता ।
समुपैहि पुनर्मदन्तिकं
मम कान्ते सुबहुप्रतीक्षिते ॥५४०॥

निजके शिरसीव यो जनः
सततं स्वं वहतीव भारवत् ।
मृगतृष्णिकयेव जातया
भविताऽसौ हि पिपासया हृतः ॥५४१॥

अवतिष्ठस एवमन्तिके
मम सर्वत्र रहोगतस्य रे ।
लघुभूषणभङ्कृतिस्तव
स्थितिमित्थं विनिवेदयत्यसौ ॥५४२॥

समुदेति तव स्मृतिः क्षणं
हृदये यस्य जनस्य शोभने ।
चषको ननु तस्य पूर्णतां
समगात् किञ्च स सार्थकोऽभवत् ॥५४३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

तदिदं भुवनत्रये तव
प्रथितं रूपमवेद्य साम्प्रतम् ।
मदमेष बिभर्मि तं क्षणं
मधुपाने सति योऽनुभूयते ॥५४४॥

प्रथमं परिवेषणं तदा
चषके कस्य विधास्यसि स्वयम् ।
तृषितो नहि कोऽपि वेद रे
सहजा कस्य तृषा भवेदिह ॥५४५॥

रणतः प्रकृतिः पलायनं
न जगन्नाथ तवास्ति काचन ।
किमहो कलहान्वितामिमां
मधुशालामपहाय गच्छसि ॥५४६॥

स्फुटमेव निवेदितं किम-
प्यनया सम्प्रति विप्रकीर्णया ।
निकटे लघुवृक्षके स्थिता
कुररीयं करुणं विरौति यत् ॥५४७॥

हसितैरिव निर्मलैः पुरा
मम मैत्री किरणैः सहाभवत् ।
अधुना तु तमोभिरेव मे
मृदु सौहार्दमिव प्रतिष्ठितम् ॥५४८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मदभीप्सितमस्ति किं न मे
　　विदितं जान इदं तु केवलम् ।
नगरे नगरे परिभ्रमं-
　　स्तव रथ्यामुपलभ्य निद्रितः ॥५४९॥

स्वरसाधनया तरङ्गितै-
　　रिव भावैस्त्वमिहासि वेल्लिता ।
अहमेष तु भग्नतां गतां
　　निजतन्त्रीं शिथिलोऽस्मि संहरन् ॥५५०॥

विदितं न मया यदेवम-
　　प्यथ ते वर्षति मय्यनुग्रहः ।
त्वयि दोषदृगासमात्मना
　　तदहो क्षन्तुमितः क्षणेऽर्हसि ॥५५१॥

विकलेव तृषाऽवलम्बिता
　　मम भाले क्षतविक्षता मुहुः ।
दृगगोचरमेकमुत्सुका
　　प्रणतिस्त्वां सुचिरात् प्रतीक्षते ॥५५२॥

मम कश्चन हृद्गतो मदो
　　मधुपानात् सुतरां शमं गतः ।
जनितो मधुपानतो मदः
　　कथमप्येष नहि प्रशाम्यति ॥५५३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

यदनुक्तमिहावशिष्यते
नहि तत् किञ्च तथापि कथ्यते ।
विरतो मम जीवनाभिध-
स्त्वदभावे हि रथः शृणोषि किम् ॥५५४॥

भविता कथनेन मे सुखं
न चमत्कारपराङ्मुखेन मे ।
प्रणयाख्य इतोऽथ चेद् भवेत्
सुरभिः स्वल्प इहोररीकुरु ॥५५५॥

नहि कश्चिदयं मतिभ्रमो
न च वा काचिदियं व्यथाकथा ।
हसितं न च किञ्चिदेव वा
रुदितं न प्रणयोऽयमात्मनः ॥५५६॥

स्फुरिते शशिमण्डलोपमे
मधुपात्रे तव हस्तयोः क्षणम् ।
जनितेन मदेन साऽभवत्
कृतनृत्येव पिपासुमण्डली ॥५५७॥

त्वदहो किमपि स्वरोल्लस-
न्मधु सङ्गीतकमुद्भवत्यदः ।
तदनाहतमन्दमूर्च्छनं
श्रुतवानस्मि रहःस्थितोऽन्तिके ॥५५८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

विनिशम्य सुगीतमेव ते
मम जातो मद एष कोऽपि रे।
मधु लब्धमिदं कराद् भवेत्
तव न व्यर्थमितीव पीयते ॥५५९॥

त्वमवेहि तवेव मय्यपी-
ह तदा दोष उदेतुमर्हति।
मधुना हि यदाऽपहाय मां
परितृप्तं कुरुषेऽन्यमेव रे ॥५६०॥

त्वदभीष्टमिहागतं भवे-
दिह नास्त्येव विरोधिता मम।
मदभीष्टमिहागता भवे-
स्त्वमिति स्नेहभरैरुदश्चति ॥५६१॥

क उपाय इतो भवेदहो
मम दाहप्रशमाय साम्प्रतम्।
प्रतपत्यवनिश्च मत्पुरः
प्रतपत्यम्बरमेतदानतम् ॥५६२॥

निपतिष्यति ते निरीक्षणै-
ककणः किं समुपस्थिते मयि।
हृदि धूम इव प्रवर्धते
मम नैराश्यमुदग्रमन्यथा ॥५६३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

विरमन्ति पिपासवः पुन-
स्त्वरया संञ्चलितास्त्वदन्तिकम् ।
भविता बत हेतुरत्र क-
स्तव सन्देश इतः किमागतः ॥५६४॥

नयने विनिमीलिते अपि
प्रसभं पश्यत एव सर्वथा ।
दृढमीलितचक्षुषा मया
न कियद्वारमवेक्षिताऽसि रे ॥५६५॥

स्वमितो विनिवेदयामि रे
कथमस्मिन् समये तवाग्रतः ।
तृषया रहिता अपीह चेत्
परितस्त्वां विचलन्ति केचन ॥५६६॥

झटितीह विनिर्गतो गृहात्
तव गृह्णन् मधु कोऽपि साम्प्रतम् ।
न जनैर्विदितो भवेदसा-
विति तत् कश्चिदयं हि धार्मिकः ॥५६७॥

नयनद्वयमुत्सतां गतं
तव किञ्चिन्मधुनः कृते मम ।
अत एव मधुप्रपा क्वचि-
न्नहि रे त्वामपहाय तिष्ठति ॥५६८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

उपदेशसमन्वितैरहं
वचनै प्रव्यथितोऽस्मि साम्प्रतम् ।
किमपि प्रियमुत्तमोत्तमं
मधु मद्गीतमुदीरयाधुना ॥५६९॥

अमृतं मधुमत्तदीक्षितं
क्षणमापीतमिह त्वया न किम् ।
ननु यस्य मदेन मादृशा
जगदेतद्धि तृणाय मन्वते ॥५७०॥

सुतरां तव रूपनामनी
नहि निर्धारयितुं क्षमोऽस्म्यहम् ।
तदपि त्वमवश्यमेव म-
य्यलमाकर्षणमातनोषि रे ॥५७१॥

महताऽसि परिश्रमेण रे
रचिता त्वं विधिना कलाकृता ।
हृदयस्थल एव तेन किं
निहितः प्रस्तरखण्ड एष ते ॥५७२॥

मधुरं पिककूजितं वृथा
मधुवीणाक्वणितञ्च तद् वृथा ।
मनसः स्थितिरन्यथा स्वरा-
कलितं श्रावय गीतमात्मनः ॥५७३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

त्वयि चिन्तनमेव मामकं
करणीयं समभूदिवाधुना ।
तव मद्विषयेऽपि किन्तु रे
प्रविधातव्यमिवावशिष्यते ॥५७४॥

करतस्तव लब्धवानहं
मधु यस्माद् दिवसान्नवं नवम् ।
व्यथितं प्रशमं गतं ततो
मम किञ्चित् प्रणयव्यथाऽजनि ॥५७५॥

विरमत्यथ नो तृषा मम
क्रमशस्त्वद्विषया प्रवर्धते ।
विनिवार्य तामुपागता
नचिरादेवमसह्यतां गताम् ॥५७६॥

अनुकूलमपेक्षते जनः
प्रतिकूलञ्च विवर्ज्य तिष्ठति ।
ननु यस्य मता पिपासुता
प्रकृतिस्तस्य मते तु का गतिः ॥५७७॥

शृणुयात् सदयो जनः क्वचिद्
वचनं कश्चिदिति प्रतीक्ष्यते ।
परमत्र महामरुस्थले
क्व पुनर्हन्त दयाम्बुदोदयः ॥५७८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

नियतिर्यदि मृत्युमानये-
ज्झटिति प्रीतिरितोऽधिका किमु ।
मम हन्त न जीवने ततः
किमपि स्यादथवा प्रतीक्षितम् ॥५७९॥

हसितेन तु यस्य जायते
नवमुद्यानमिवातिशोभनम् ।
रुदितेन तु यस्य भूरुहा
बत मुञ्चन्ति च पत्रसञ्चयम् ॥५८०॥

शलभा अयि दीपिके त्वया
न कियन्तो बत भस्मसात् कृताः ।
परिकल्पय भाविनीं दशां
विरते स्नेहकणे निजामपि ॥५८१॥

विचलेन्नहि यस्तव क्षणं
मुखलावण्यमुदीक्ष्य मादकम् ।
प्रविशन् स मधुप्रपां जन-
स्त्रपते नैव कथं जडीकृतः ॥५८२॥

मिलितेषु सदा परस्परं
नतयः केयमहो विडम्बना ।
भविता व्यवहार आवयो-
रुपचारेण विवर्जितः कदा ॥५८३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

हसितान्युपलक्ष्य तानि ते
सदसि प्रीतिविवर्जितान्यहो ।
उपलक्षितमेव किं त्वया
रुदितं केन जनेन वा कियत् ॥५८४॥

वचनेन मितेन वीक्षितै-
श्च मितैः स्नेहजलार्द्रतां गतैः ।
प्रणयो हि मितैश्च सुस्मितै-
स्त्वयि मुग्धे विनिवेदितस्तया ॥५८५॥

प्रविधातुमशक्य एव ते
क्वचन प्रत्युपकार आत्मना ।
नियतं नतमेवमात्मनः
पुरतस्ते शिर आवहामि यत् ॥५८६॥

मम पार्श्वगतस्तथाऽसि न
त्वहमप्यस्मि यथा स्वपार्श्वतः ।
इति सत्यपि केन हेतुना
मम नाद्यावधि गोचरोऽभवः ॥५८७॥

क्षणमेहि च वर्ष च क्षणं
मयि रे प्रज्वलिते मराविव ।
हृदि दाहकरोपि साम्प्रतं
जलद त्वं हि पुनः प्रतीक्ष्यसे ॥५८८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

तमनागमनव्रतं जनं
व्रतमेतद् विहितं प्रतीक्षितुम् ।
शिथिलत्वमुपैति तद् व्रतं
मम वा तस्य विलोकयतामिदम् ॥५८९॥

हसितं मम जानते जनाः
पशवो वा विहगा अथापि वा ।
करुणं च विशिष्य नीरवं
रुदितं कोऽपि न वेद मामकम् ॥५९०॥

रजनी तिमिरावगुण्ठिता
पुरतो मे ह्युपसर्पति क्वचित् ।
अहमेक इहास्मि नीरवं
करुणं हन्त नदीतटे रुदन् ॥५९१॥

विरहस्य बत क्षणा इमे
रिपवो मामतिपीडयन्त्यमी ।
सकला अपि हन्त साम्प्रतं
समभूवन् रिपवः पराङ्मुखाः ॥५९२॥

विमृशामि तथापि चेतना
प्रदहन्ती प्रशमं न यात्यसौ ।
तव हन्त कटाक्षवारिदः
परितप्ते मयि किन्न वर्षति ॥५९३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

परिणाममवैमि केवल-
स्य तवैवेममवेक्षितस्य रे।
मयि वा विनिपत्य रे कदा
मम तत्सार्थकतां विधास्यति ॥५९४॥

जडतैव ममास्ति वेद नो
मयि लीनां भवतीं कथञ्चन।
इति हन्त दुरन्तया मम
व्यथया जीवनमस्ति यापितम् ॥५९५॥

किमु न प्रणयापगाऽगम-
ज्जगतीत्थं खलु काकपेयताम्।
करुणाख्यमरालपङ्क्तयः
क्वचिदुड्डीय गताः सुशोभनाः ॥५९६॥

उपलभ्य तवेङ्गितं मुदा
सजलो मेघ इवाहमागतः।
प्रतिकूलतया विधेरहो
प्रतिकूलः पवनोऽयमुद्गतः ॥५९७॥

तव भित्तितले हि यापयन्
दिवसानासमतीव शीतले।
गमनाय ततोऽपि निर्दिश-
स्यथ नेया दिवसाः क्व निर्दिश ॥५९८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मरुरेव मदीयजीवनं
सरसं स्यादिह येन सर्वथा।
नववारिदवत्तव क्षणं
विलसेदेवमनुग्रहस्तव ॥५९९॥

इह वज्रजडेन केनचिद्
विधिनाऽहं दयनीयतां गतः।
मृदुभावनयोपसङ्गतो-
ऽहमपि प्रीतिपरोऽन्यथा न किम् ॥६००॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

सप्तमं शतकम्

सफलत्वमियाय सर्वथा
मम न प्रार्थितमीदृशं त्वयि ।
तदपीह कथञ्चिदाशया
मधुनो द्वारि तवाहमागतः ॥६०१॥

कठिनं मयि किञ्चिदस्ति यद्
विगतं नानुभवामि सर्वथा ।
मधु लब्धमिदं क्वचिन्नु मे
हृदयं प्रस्तरमेवमार्द्रयेत् ॥६०२॥

कुसुमानि मृदून्यवाप्य ते
समभूत् कण्टकितं वपुर्मम ।
उपयाति शमं विरोधिता
तव सङ्गादिति किं मृषैव तत् ॥६०३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

कथयाऽलमरे मदीयया
व्यथया सङ्गतया विशीर्णया ।
अवता बत जीवनाभिधां
निजकन्थामिह यापितं मया ॥६०४॥

सुहृदः शृणुताधुना क्षणं
नहि याचे बत तेजसः कणम् ।
घटिता तमसा सहैव य-
न्मम मैत्री जगतीह सर्वथा ॥६०५॥

मम कामपि कोमलां हृदि
क्षणमुद्भावय भावनामिह ।
अचिरं सर एतदन्यथा
मलिनं किञ्चन शुष्कतां गतम् ॥६०६॥

इह वञ्चितमेव विद्धि मा-
मधिकं वच्मि न किं निजैर्जनैः ।
तृणमस्मि तदेव यद् भृशं
बत वर्षास्वपि शुष्कतां गतम् ॥६०७॥

कथितं किमु नैव तद् भृशं
यदिहासीत् कथनीयमन्ततः ।
मम मौनमतः परं क्षणात्
तव जिज्ञासितकं विनेष्यति ॥६०८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मयि यावदिदं पतेन्न ते
विनते किञ्च नते निरीक्षितम् ।
विलयं बत तावता व्रजे-
न्न मदस्तित्वकबुद्बुदः खलु ॥६०९॥

तव सङ्गवशादिदं मम
व्यथितं सुस्पृहणीयतां गतम् ।
यदि किञ्चिदिदं मधु क्षणं
तव हस्ताच्चषके पतेन्मम ॥६१०॥

गुरुता लघुताऽपि वा भवे-
दिति तां प्रत्यभिधास्यते मया ।
तव दृग्विनिमीलनस्य रे
फलमद्यावधि भुज्यते मया ॥६११॥

विगतेषु दिनेषु जीवितं
भृशमश्रूणि विमुञ्चता मया ।
अधुना तु विनैवमश्रुभि-
र्विषमं मे रुदितं प्रवर्तते ॥६१२॥

द्रुतिमेति न हन्त मामकं
कथमस्तित्वदृषत् समन्ततः ।
तव कोमलपाणिपद्मतो
मधुलाभेऽप्यभिधेहि साम्प्रतम् ॥६१३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

क्वचिदुत्कटसैकतो मरुः
क्वचिदुद्यानमुदीर्णसौरभम् ।
रुदितेन विलम्बितं क्वचिद्
द्रुतमेदद्धसितेन च क्वचित् ॥६१४॥

अमृतं किमु किञ्च वा विषं
बहवो जानत एतयोर्भिदाम् ।
प्रणयाख्यमधुन्युपाहृते
न वयं केचन भेदबुद्धयः ॥६१५॥

सहजं रुदितेन याप्यते
सहजं स्वानुभवेन जीव्यते ।
प्रतिकूलमपि व्यथाजग-
न्मम मन्ये ह्यनुकूलतां गतम् ॥६१६॥

तव दृक्परिवर्तनादिदं
मम भाग्यं परिवर्तितं पुनः ।
त्वदधीनमिमं जनं कदा
परिपश्यस्यनुकूलतां गतम् ॥६१७॥

मम भाषितकं वृथैव रे
हृदयस्यास्य पुरस्तवाधुना ।
तदपीह करे वहन्निमं
चषकं रिक्तमहं कियत् सहे ॥६१८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

इह सभ्य इति प्रकथ्यते
समुदाचारपरायणो जनः ।
हृदयस्य कथापि येन ना-
धिगता न प्रणये च जीवितम् ॥६१९॥

कुसुमस्य वृथाऽस्ति जीवनं
सुरभिं नाम विना यथा भुवि ।
प्रणये च विना यथैव ते
विकलत्वं ननु सिद्धमस्ति रे ॥६२०॥

समजायत किं वृथैव ते-
ऽङ्घ्रियुगे पुष्पचयो निवेदितः ।
क्षिपति क्वचिदन्ततो दृशं
त्वयि मां किञ्चिदुपेक्ष्य साम्प्रतम् ॥६२१॥

सरसि त्वयि यन्निमज्जन-
स्पृहया साम्प्रतमागतोऽस्म्यहम् ।
यदि सिध्यति सा न चेत् तवै-
व तटे स्यामहमेष यापयन् ॥६२२॥

सुबहूनि ममेह जीवने
करणीयानि तथापि चेत्तव ।
अवलम्बनमस्ति नैव किं
सरिदुत्तर्तुमथापि शक्यते ॥६२३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

न ममाविनयस्त्वयाऽधुना
किमपि क्षम्य इतो भवेद् यदि।
अवसादवशीकृतो जनः
स्वमिदानीं कथमेवमुद्धरेत् ॥६२४॥

मधु निम्नमतीव कस्यचि-
न्मधु रे मध्यममस्ति कस्यचित्।
दृशि कस्यचिदुत्तमं मधु
प्रियमस्मादधिकं न मन्मते ॥६२५॥

मधु निम्नतमाः पिबन्त्यमी
मधु सेवन्त इमे च मध्यमाः।
मधुपानपरा इहोत्तमा
वयमन्ये मधुनः पिपासवः ॥६२६॥

मधुरं मधु तस्य दर्शनं
परिरम्भोऽपि च तस्य रे मधु।
मधुरान्नहि तस्य सुस्मिता-
दिह मन्ये मधु किञ्चिदुत्तमम् ॥६२७॥

सुखिनामिह तन्मधु प्रियं
प्रियमेतन्मधु दुःखिनामपि।
असवस्त्वदमस्ति नः कृते
सुखदुःखे समतीत्य तिष्ठताम् ॥६२८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

उमशाम्यति मध्यवर्तिनी
मधुना काऽपि भिदा तदावयोः ।
मधु हन्त यदैव पायिनी
चषकैः पाययते पिबत्यपि ॥६२९॥

उररीकुरुते खगो नु यो
नियतिं पञ्जरबद्धतां यदि ।
गगनेऽपि गतः स पञ्जर-
स्य हि तस्यैव पुनः पुनः स्मरेत् ॥६३०॥

विरतं विनिवेदनादिदं
न जनं विद्धि कथञ्चिदेव रे ।
त्वयि काचिदिहास्य मौनिता
विकलत्वं जनयेत् कदाचन ॥६३१॥

मम साधनतां गतं सुखं
मम दुःखं ननु साध्यतां गतम् ।
अतिमात्रमभीप्सितं ततो
मधु मे किञ्चिदुपाहृतं तया ॥६३२॥

मम सन्निकटे सुहृत्समः
क्वचिदेकान्त इह प्रवर्तताम् ।
प्रिय एष यतः कुतोऽपि मे
मधु यत्किञ्चिदुपाहरिष्यति ॥६३३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

सकलं विरसं भवेदिदं
यदभावे मरुवच्च जीवनम् ।
तदहो मधु वस्तु नापरं
मम सर्वस्वमिदं हि मन्मते ॥६३४॥

सदपीदमहो निरर्थकं
जगदस्तित्वमिहानुमीयते ।
मधु तत्करतो यतः क्वचि-
च्चषकेऽस्मिन् मम न प्रवर्षति ॥६३५॥

नहि कश्चिदिदं मधूत्तमं
मधुसामान्यतयाऽवलोकयेत् ।
इदमान्तरिकत्वसिद्धये
सुगृहीतं न मदस्य लिप्सया ॥६३६॥

अवलोकयितार एव मां
बहवो मद्यप इत्यवज्ञया ।
तदपीह करे वहन्निमं
चषकं हन्त परिभ्रमाम्यहम् ॥६३७॥

न हठो मम मे न चाग्रहो
मधुपानार्थमुदेति मानसे ।
मयि कश्चिदनुग्रहस्तवे-
ति मदीयाऽस्ति प्रवृत्तिरीदृशी ॥६३८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

श्रुतरूपधनोद्भवा मदा
उपशाम्यन्ति यदेश्वरेच्छया ।
मधुनो मद एष कस्यचिद्
विरलस्यैव तदा प्रवर्तते ॥६३९॥

नहि किञ्चिदिहास्य भेषजं
मम वैकल्यमसाध्यमेव रे ।
मधु किञ्चिदुपाहरेदिदं
मयि शान्तिं बत तां सुदुर्लभाम् ॥६४०॥

उपलब्धिरियं महीयसी
यदिदं जीवनमस्ति नाम रे ।
तदनेन गृहाण सन्मणीन्
रमसे क्षुद्रवराटकैः कथम् ॥६४१॥

परिणाममवैमि सर्वथा
मधुपानस्य तथापि साम्प्रतम् ।
अवरोद्धुमिमौ मधुप्रपा-
मुपयान्तौ चरणौ न शक्यते ॥६४२॥

मधुपानमिदं प्रदर्शनं
नहि यच्चत्वरतः प्रवर्तताम् ।
न च कश्चन तच्च मामको
व्यवसायो यदिह प्रदर्श्यताम् ॥६४३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मधुनोपचरेत् कियज्जनः
क्षतमस्तित्वमनेकशो निजम् ।
मधु किञ्चिदिदं न चेद् व्यथां
शमयेत्तज्जनितां सुसेवितम् ॥६४४॥

समयस्त्वरया पलायते
त्वरितस्तेन सहैव यो व्रजेत् ।
भवतीह स एव लाभवा-
नितरे हन्त विनष्टिमाप्नुयुः ॥६४५॥

स हि बिम्बतया प्रतिष्ठितो
वयमेते प्रतिबिम्बतां गताः ।
विविधत्वमिदं तु किञ्च त-
त्तदधिष्ठानभिदात आगतम् ॥६४६॥

व्यथते निजया पिपासया
परितृप्तिं न निजां च काङ्क्षति ।
मधुपत्वमिदं विलक्षणं
मम दुःखं न च तत्सुखं मम ॥६४७॥

समतां विषमेषु को नयेत्
मधुपानं प्रविहाय सर्वथा ।
नहि भेद इहोच्चनीचयो-
र्मधुपाने महसि प्रवर्तिते ॥६४८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

अतिम त्ररहस्यमात्मनो
मधुमद् भाषितमस्ति नैव रे।
किमपीह तथापि गूढमि-
त्यवगच्छन्तितरां सचेतसः ॥६४६॥

मृदुता तु तवैव मार्दवं
मम रे सज्जनयत्युदीरिते ।
वचसीह मरूपमस्य मे
क्व भवेद् वा श्रवणार्हताऽन्यथा ॥६५०॥

मधुपात्रमिव त्मनो गतं
सकलं जीवनमेव रिक्तताम् ।
त्वयि सम्प्रति मां प्रति स्वतः
प्रतिपन्ने विमुखत्वमीदृशम् ॥६५१॥

मधु रे त्वदधीनमेव तत्
मदधीनश्चषकोऽयमेष रे।
उभयोर्घटितेयमावयो-
र्मधुरा संघटनेव साम्प्रतम् ॥६५२॥

नवतां समुपैति ते यथा
मधुलावण्यमिदं क्षणे क्षणे।
मधुमत्तव किञ्च भाषितं
किमपि स्वादु तथा पदे पदे ॥६५३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मधुमत् सकलं चराचरं
मम दृश्यस्ति पिपासुताजुषः ।
किमु मच्चषके ततोऽधुना
मधु रे त्वत्करतः पतिष्यति ॥६५४॥

अनुदारमिदं जगद् यथा
प्रतिभातीव मम प्रसङ्गतः ।
जगदेति तथाऽनुकूलतां
स्मृतमात्रे तव नाम्नि भामिनि ॥६५५॥

प्रविश त्वमितो नहीति या-
वदहं धर्मगृहान्निवारितः ।
तव तावदहो प्रपागृहा-
दित एहीति मया वचः श्रुतम् ॥६५६॥

झटिति त्वमभूरुपस्थिता
स्मृतमात्रैव तदा पुरो मम ।
स्खलितो हि यदाऽहमक्षमः
क्षणमुत्थातुमभूवमात्मना ॥६५७॥

किमपीह किमेव वच्म्यहं
तव रे प्रत्युपकर्तुमक्षमः ।
मधुनो मधुरस्य पाणित-
स्तव किं पात्रमहं कथञ्चन ॥६५८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

अयमस्ति ममेति यत्कदा-
चिदहं स्यां मधुनेह वञ्चितः ।
अपि मच्चषकं करान्मम
प्रतिकूलेव बलाद् ग्रहीष्यसि ॥६५९॥

नहि दूर इतस्तव प्रपे-
ति विजानामि तथापि साम्प्रतम् ।
इत एव यथाकथञ्चिद-
प्युपसर्तुं न तदन्तिकं क्षमः ॥६६०॥

तव कैव मधुप्रपेह या
शमयेन्नैव पिपासुतां मम ।
परितृप्त उपेत्य चेदितः
सकलो मामपहाय यात्यहो ॥६६१॥

मम काचिदहो पिपासुता
तव मां नीतवतीयमन्तिकम् ।
मधुनः क्षणमेष पानतः
कथमेनां विनिवारयाम्यहम् ॥६६२॥

मधुभावनया कयाचन
स्वहृदीत्थं समुदीर्णयाऽधुना ।
अहमेष पिपासुतां निजां
कलयाम्येव कृपां नु तावकीम् ॥६६३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

रुचये मम नैव तत्सुखं
परितृप्तेर्मधुपानतः किल ।
मदभीष्टतमा पिपासुतै-
व यया त्वामुपलब्धवानहम् ॥६६४॥

मधुरादिह मां मधुस्मिता-
न्न निजात् किञ्चन वञ्चयिष्यसि ।
इति नाम कदाचिदाशया-
ऽहमुपेतो नगराद् दवीयसः ॥६६५॥

बत पश्चिमयैव सर्वथा
मम मत्या स्फुरितं न तत्क्षणम् ।
मधुनो ग्रहणप्रसङ्गत-
स्तव सङ्केतमहो न पृष्टवान् ॥६६६॥

पुनरुक्तय एव केवलं
यदपीमाः सकला मदुक्तयः ।
तदपीह निशम्य ताः स्मितं
कुरुषे तत्तु तवैव मार्दवम् ॥६६७॥

रुदितं हसितञ्च यन्मया
सकलं तद् भवते समर्पितम् ।
निजरञ्जनमात्रलोलुपो
न खलु क्षुद्रजनोऽत्र खेलतु ॥६६८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy.

कठिनं किमपि स्थितं हृदि
द्रवतां किञ्चिदुपैति मे यदा ।
कवितेव तदुत्सतस्तदा
प्रवहत्यन्तरनन्तमागंगा ॥६६९॥

मृदु नूपुरशिञ्जितं न ते
मम यावद् हृदि रङ्गमञ्चके ।
प्रकटीभवति त्वदङ्घ्रितः
क्व पुनस्तावदिदं सुभाषितम् ॥६७०॥

मम वाग् रहसीदमेकदा
प्रकटीभूय विकीर्णमब्रवीत् ।
नितरामहमस्मि पीडिता
तव मूकायितकेन साम्प्रतम् ॥६७१॥

नहि यावदुपैति तस्य चे-
च्छ्रवसो गोचरतां निवेदितम् ।
मधुमन्ति सुभाषितानि मे
नहि तावत् फलवन्ति किञ्चन ॥६७२॥

कवितेति जना मदीरिता-
न्यपि तथ्यानि विदन्ति कल्पनाम् ।
यदि चेदिह रोदिमीत्यमी
विहसिष्यन्त्यनुमीय नाटकम् ॥६७३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मम वाणि कवित्वरूपतां
यदि गृह्णासि गृहाण सर्वथा ।
मितया च ससारया त्वया
ननु भाव्यं नहि शब्दमात्रया ॥६७४॥

कवितेति विनिश्चिनोति मद्-
भणितं कोऽपि यदा सुहृज्जनः ।
सफलेत्यधिगत्य लेखनीं
परिचुम्बामि निजां मधुस्पृशम् ॥६७५॥

नगरान्मयि निर्गते यदा
मदभावो व्यथयेत् तदा नु माम् ।
स्मृतिगोचरतां नयेः क्षणं
मम पद्यैः कतिभिश्चन स्मृतैः ॥६७६॥

नहि यावदिदं सुभाषितं
लभते त्वत्स्मितसत्पुरस्कृतिम् ।
नहि तावदिहास्य कल्प्यतां
भुवने सार्थकता कथञ्चन ॥६७७॥

कठिना कठिनी न मामकी
न गुणांस्ते लिखितुं खलु क्षमा ।
इति वेद्मि तथापि मद्व्यथा
लिखितुं प्रेरयतीति लिख्यते ॥६७८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

रचना प्रभवत्यसौ ममे-
तिं जगन्नाथ न गर्वितो भव ।
वद सत्यमिह त्वया न किं
मधु रे तत्करलब्धमर्पितम् ॥६७९॥

किमपि व्यथया नु जातया
द्रुतिमेतीव यदा हृदि स्थले ।
तदिह स्फुटतामुपैति मे
मितवागावृतिभूषितं तदा ॥६८०॥

न रसध्वनयो न वाऽप्यलङ्-
कृतयो बाधकतां प्रयान्ति मे ।
हृदि यद् रुदितं रहस्यहो
तदिदं मे कवितेति कल्प्यताम् ॥६८१॥

यदकिञ्चनकेऽपि मय्यहो
भवतां चेतसि काचिदार्द्रता ।
तदियं हि पुरस्कृतिर्मता
न पुरस्कार इतोऽधिकः परः ॥६८२॥

व्यथितं हृदयस्य येन न
स्फुटतां वा भणितेन गच्छति ।
नहि तेन कवे श्रुतेन मद्-
व्यथितं रे जनय त्वमात्मना ॥६८३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

दृगपाङ्गविशेषपातना-
दनुगृह्णाति यदा सरस्वती ।
भणितिर्हृदये कवेस्तदा
रसभावाकलिता प्रकाशते ॥६८४॥

रसमय्यवधारणा मम
स्फुरति त्वद्विषयेव या हृदि ।
समुपैति हि सा यदा कदा
किमु भङ्गीभणितिस्वरूपताम् ॥६८५॥

न यया परितोषितं मनः
सुजनानां न यया च दुर्हृदाम् ।
हृदयं मृदुतां गतं तया
न भणित्या किमपि प्रयोजनम् ॥६८६॥

न यशो न मनोऽनुरञ्जनं
मम साध्यं कविकर्मणि स्थितम् ।
अनया खलु चेष्टया स्वहृद्-
गतमावेद्यत इत्यभीप्सितम् ॥६८७॥

प्रणयः क्वचिदेति गीतता-
मपि सङ्गीतकतामुपैति च ।
क्वचन स्मितभावमेति च
क्वचिदाप्नोति कवित्वरूपताम् ॥६८८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

वचनैः प्रतिपादितं भवेद्
यदि वक्तव्यमतीव चेन्मितैः ।
अतिविस्तृतशब्दजालकै-
र्भृतया किं कथया प्रयोजनम् ॥६८६॥

श्रवणाय तवेयमादराद्
रचितेयं नवपद्यमालिका ।
विफलोऽध्यवसाय आत्मनो
न खलु श्रोतुमिमां यदीहसे ॥६९०॥

कवितेति न यत्न एष मे
कवितां यत् कवयो हि कुर्वते ।
न बिभर्मि कवित्वमीदृशं
भणितिर्मे किमपीङ्गितं त्वयि ॥६९१॥

कविता रसभावनिर्भरा
रमणीयार्थविशेषपेशला ।
किमपि स्पृशतीव सङ्गता
क्षणमन्तर्हृदयं सचेतसाम् ॥६९२॥

रचना मधुनामसङ्गता
मम हेया न भवद्भिरीदृशी ।
चरणामृतमेतदात्मना
ननु तस्यैव यतो मयाऽऽहितम् ॥६९३॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

क्षणमुत्सुक ईक्षते पुरः
क्षणमानस्य मुखञ्च तिष्ठति ।
कविताशरविद्धहृज्जनः
क्षणमुत्प्राण इव प्रचेष्टते ॥६९४॥

कुसुमप्रकरेषु कण्टकाः
सुरगोष्ठीषु तथा च राहवः ।
कुधियोऽरसिकाः सदःस्थिताः
प्रदहन्तीव सचेतसो जनान् ॥६९५॥

कविताऽकथितस्य कस्यचित्
कथनं सा पुनरुक्तिरन्यथा ।
हृदयं द्रवतां नयेन्न यद्-
भणितिः सोऽस्ति न सार्थकः कविः ॥६९६॥

तुषराशिरिव प्रजायते
विततः शब्दसमुच्चयो वृथा ।
कविभिस्तु स एव योजितो-
ऽग्निरिव प्रज्वलति प्रदीपितः ॥६९७॥

इदमात्मनिवेदनं न रे
कविता नापि च गीतमीदृशम् ।
इदमर्पितमेव ते मया
त्यज वाऽङ्गीकुरु यत्तवेहितम् ॥६९८॥

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

त्वदनुग्रहतो मयाऽपि यत्
किमपीदं भणितं पुरस्तव ।
अपि न श्रवणार्हमस्ति तत्
श्रुतमित्येव तदस्ति सार्थकम् ।।६९९।।

मधुभावभरेण यन्मया
मधुमत् किञ्चिदुदीरितं वचः ।
मृदु मृद्धि तदर्पितश्च ते
कवितेत्याहुरमी सचेतसः ।।७००।।

ध्वनितं क्वचिदन्तरध्वनि
क्षणमेतद् भविता सचेतसाम् ।
यदि नाम तदैव भाषितं
मम किंचित् फलवद् भवेदिदम् ॥७०१॥

× × ×

मम सप्तशतीयमुज्ज्वला
'चषकाणा'मवतिष्ठते पुरः ।
कृपया मुदिताः सचेतसः
सुविधातार इमां हृदि स्थिताम् ।।

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

।। इति ।।

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

पद्यानुक्रमणी

अ

अतिगूढरहस्य ४०१
अतिमात्रमधिप्रपं ४५७
अतिमात्रमिदं वि ४१६
अतिमात्रमुपैतु २८२
अतिमात्ररहस्य ६४६
अतिमात्ररहस्य ३२६
अथ पारमुपैतु ५३७
अथ भारमिवा १६५
अधराङ्गुलिचेष्टया १५६
अधरो रस एव ते १२५
अधिकाय क एव २१७
अधिकार इतीव १३४
अधुना मम सन्निम १४६
अधुना विनिवार्य ४८२
अधुनेह दयोन्मुखा ३७४
अनलो बहिरेष २१२
अनिमित्तमिव २६२
अनुकूलमपेक्षते ५७७
अनुदारमिदं जगद् ६५५
अनुभूतिमुपेतया ३४
अपराध इतीव न ३८
अपि कोऽपि तव १२२
अपि नाम मधु स्रवे ११०
अपि मां क्षणमुत्सुकं १०२
अपि मौनमिदं मम ४१
अभवन्मम जीवना १६७
अभिधेयमुदीरितं ४८४
अभिवर्षतु वा न २६५
अमृतं किमु किञ्च ६१५
अमृतं मधुमत्तदी ५७०
अयशस्करमेव १६१
अवगच्छसि मूक ३१६
अवतिष्ठस एव ५४२
अवरुन्धि न मां ७८
अवलोकयितारः ६३७
अवसादमिमं मनो ४१३
अविवेकवतां तु १४०
असवोऽपि समर्प ३३२
अहमेष गवेषय ४०८

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

अहमित्यहमित्यु ७१
अहमेव न केवलं ३९६
अहमेष समुद्यतः ४८९
अहितो हितमाचरेद् २५६

इ

इदमत्र मदीय ४३१
इदमात्मनिवेदनं ६९८
इदमात्मनिवेदनं ३६१
इदमेव मया प्रतीक्ष्यते १३१
इयता मुखरेण २४५
इयमेव कथा ६६
इयमेव तटस्थता १२
इह कश्चिदतृप्त एष ४९६
इह कस्यचिदेव मुग्धया ३०
इह कामदुघत्वशोभितां २८५
इह केचन पापपुण्ययोः २४२
इह केचन मां २०६
इह कोऽपि समव्यथो ८
इह खेदकरं परं ४५१
इह तिष्ठ ततो न ६६
इह तिष्ठ सुधा ४०३
इह दुःखनिवेदनं ५००
इह दुःखमये धरातले ११८
इह नाकलितं मया ३८९
इह नामिलदेव नामिलत् ३२४
इह मां तव मन्दिरान्निरा ३५२
इह यस्य तु जीवनं व्यथा ३४७
इह वज्रजडेन केनचिद् ६००
इह वञ्चितमेव विद्धि ६०७
इह सभ्य इति ६१६
इह सार्थकतां व्रजेदिदं २६८
इह हन्त शयानमध्वनि ४६४

उ

उदयं हृदये तव ३७३
उदियात् सकलेऽपि ४१७
उपगम्य मधुप्रपा ५६
उपदेशसमन्वितैरहं ५६६
उपयान्ति कथं नु २६७
उपलब्धमिदं विधेर्व ४७५
उपलब्धिरियं महीयसी ६४१
उपलभ्य तवेङ्गितं ५६७
उपशाम्यति मध्यवर्तिनी ६२६
उपसर्पति मालयो मरुत् २७
उपहृत्य कणान् प्रदर्शय १८५
उररीकुरुते खगो नु यो ६३०
उररीक्रियते न केवलं ३६५

क

क उपाय इतो भवेदहो ५६२
क उपाय इतो विधीयतां ४६२
कठिना कठिनी न ६७८
कठिने प्रविकीर्णकण्टके १०६
कठिनं किमपि स्थितं ६६६

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

कठिनं मयि किञ्चिदस्ति	६०२	किमपीह विधेयमित्यरे	४५४
कठिनं मयि यच्च	३१३	किमु न प्रणयापगाऽगमत्	५९६
कतिचित् प्रपिबन्ति	१३३	किमु भीमतरङ्गभङ्गिभिर्	१७
कति सन्ति पिपासवः	५३१	कियता नियमेन पूजय	१९९
कथने मनसि स्थितस्य	४०९	कियदेतदुपाददे गतं	१४३
कथमण्वपि नानुकूलतां	११२	किरणाय नमो विदमहे	७७
कथमप्यभिधानमेव	२८६	कुटिलानि तदिङ्गिता	४४३
कथमेव नहि त्वदग्रतः	४७४	कुसुमप्रकरेषु कण्टकाः	६९५
कथमेव निवार्यतामयं	५३४	कुसुमप्रकरोऽस्मि पादयोस्	६८
कथयालमरे मदीयया	६०४	कुसुमस्य भुवि व्यथां जनो	१७३
कथयोदितया पुनः पुनः	५३	कुसुमस्य वृथाऽस्ति जीवनं	६२०
कथितं किमु नैव तद् भृशं	६०८	कुसुमस्रगियं करस्थिता	३८१
करतस्तव लब्धवानहं	५७५	कुसुमाङ्कुरणं तु दूरतो	३८२
करुणा जगतीतलात्तथा	५११	कुसुमानि मृदून्यवाप्य ते	६०३
कलहस्य न तेन कश्चना	३४५	कुसुमाय करौ प्रसारितौ	२०७
कलहः सहजः परस्परं	७२	कुसुमावलिषु व्यथामहं	३११
कलिकाऽनुभवेदिहा	२५५	कुसुमैः समलङ्कृता	१२३
कलिकासु सुकोमलासु	३३८	कुरु न प्रतिबद्धमद्य	७९
कविताऽकथितस्य कस्यचित्	६९६	कुरु साम्प्रतमग्निसाददं	३५४
कविता रसभावनिर्भरा	६९२	कुसुमे सहजातिसुन्दरे	२३
कवितेति जना मदीरिता	६७३	कृत एष विनैव भूमिकां	१३६
कवितेति न यत्न एष मे	६९१	क्रियते न कथं समन्वितं	४३४
कवितेति विनिश्चिनोति	६७५	क्वचिदग्निशिखा गतैव	१३८
किमतृप्तिमहं निजां ब्रवी	२८८	क्वचिदन्यत एव गम्यते	२२१
किमपि त्रपते मधुप्रपां	२०१	क्वचिदुत्कटसंकतो मरुः	६१४
किमपि व्यथया नु जातया	६८०	क्वचिदेव विधेरनुग्रहात्	५३५
किमपीह किमेव वच्म्यहं	६५८	क्वचिदेव समुन्मिषत्यसौ	३१

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

क्व पुराणमर्पैति वा २९२

क्ष

क्षणमप्यतितीव्रतां १०५
क्षणमाकलितं यदि ४१८
क्षणमुत्सुक ईक्षते ६९४
क्षणमेहि च वर्ष ५८८
क्षिपति स्वकरेण २०४
क्षुधिता पृथिवी पिपासया ३२

ख

खर आतप एव चन्द्रिका ८७

ग

गमनाय मया विधेर्वशात् ४५८
गमनं विनिवार्य लोचने ३९०
गमयालमिमानि पल्वला २२८
गुरुता लघुताऽपि वा ६११
गुरुराह मम स्म ४४

घ

घटते क्वचिदेव ३७७
घटनावशतो यदङ्गुलेर् १८६
घटनावशतः सुदूरगो ३२७
घटते हृदयस्तरे न ५१५
घटितो ह्यनुराग एव ११७
घटितं विघटय्य सर्वथा २७३

च

चतुरत्वमिहास्ति साधनं ३७१
चपले चपलाऽसि ते १४२
चरणान्तिकगो भवानि ते २५६
चरणौ गमनार्थमुद्यतौ ६३
चषकस्य कृते न खिद्यते २२०
चषकस्य पिपासुता मम ७
चषकः परिपूर्य दीयते ८९

छ

छलनाऽपि मयोररीकृता ५२१
छमिति च्छमिति त्वमागता २६५
छलितो बहुभिर्जनैरहं ४९६
छलितं सुतरामिहाशया ३०६

ज

जगतो नहि मे ५८
जगतो विषमस्य ३३१
जगदस्ति मृषेति ४२७
जडकाष्ठचयेषु सर्वथा ५३०
जडताञ्च नयेत् ११
जडतैव ममास्ति ५९५
जनसङ्कुलता न ५०२
जनिमेति कियन्नु ३६
जलदत्वमिहास्ति ४७८
जलदे त्वयि दूरगे ११४
जलधिस्त्वमसीति २६९

झ

झटिति त्वमभूरुप ६५७
झटिति द्रुतिमेति ३३०

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

झटितीह विनिर्गतो ५६७

त

तत एव भवेन्मधुप्रपा ५०
तदनागमनं वरं मतं ४५३
तदपाङ्गनिरीक्षणे २०५
तदिदं भुवनत्रये तव ५४४
तपतस्तपनस्य शस्यते १७८
तम एव ममाग्रतः स्फुर १४१
तमनागमनव्रतं जनं ५८६
तदिहार्पय यत्समीहसे २७०
तमसा क्षुधितेन खादितो ४२०
तमसा न वधान मां ४७०
तमसा सह किन्नु २१६
तमसो विनिवारणे १७७
तव किञ्चिदुदग्रतारकै ३४१
तव कामपि दृष्टिमात्मनि ४०५
तव कैव मधुप्रपेह ६६१
तव गोपनरीतिरीदृशी ८५
तव चेतसि काऽपि १४४
तव चेष्टितनाटकस्य १३२
तव चेतसि न स्थितिं ३६७
तव नाम किमुत्तरं भवेत् ३६६
तव नाम कियद्भिरीक्षितं ४३६
तव दृक्परिवर्तनादिदं ६१७
तव दृष्टिविशेषलाभतो ४४७
तव नाम तटस्थता १४
तव नश्यति नीडमन्ततो ५१८
तव नाम तटस्थता १६
तव नाम शपेऽधरोष्ठयोः २४१
तव नैव सहानुभूतयो ४५
तव भित्तितले हि ५६८
तव मां प्रति काऽपि २६०
तव यत् त्वयि यच्च ४७
तव यावदुपेतवानहं ४२३
तव रूपकणो मयोषसि ६४
तव रूपमपूर्वमात्मसात् २६१
तव रूपमपूर्वमादरात् १६३
तव रूपमिति प्रकल्प्य ३३३
तव रूपमिदं हि मृण्मयं ६०
तव रूपरहस्यमात्मना ३६
तव रे ज्वलतीव यः शनैः १२६
तव रे मधुसागरादहं ३३६
तव सङ्गवशादिदं ६१०
तव हन्त कृपाघना ४६०
तव हस्तगतं सुधा ४१०
तुषराशिरिव प्रजायते ६६७
तृषितं मधुने हि ४१
त्यजत स्वपरेति ४६८
त्वदनुग्रहतो मयाऽपि ६६६
त्वदनुग्रहमेव सर्वथा ४२
त्वदनुग्रहसङ्गता ३८७
त्वदभीष्टमिहागतं भवे ५६१
त्वदहो किमपि स्वरोल्लस ५५८
त्वमवेहि तवेव ५६०

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

त्वमशब्दमितो गता १७१
त्वयि चिन्तनमेव ४६३
त्वयि चिन्तनमेव ५७४
त्वरया स विनिर्गतः १८१
त्वरितं पवन त्वयात्मना ३३७

द

दयसे त्वमकिञ्चनेषु ३६०
दर एष ममोपजायते ४५०
दिवसोऽपि नु यस्य ४८५
दिवि विद्युदिव स्फुरत्यसा १४७
दृगपाङ्गविशेषपातना ६८४
द्रुतमस्त्यथवा विलम्बितं ५६
द्रुतिमेति न हन्त मामकं ६१३

ध

धृतया हृदयंकभाजने ३२०

न

न कटाक्षितकस्य २१४
न कदाचिदसत्यभाषणं ५३९
न कियन्ति सरांसि वा ४९२
न कुतोऽपि पलायितस्य रे ४६३
न कृतेस्य शरीरकस्य रे ५२५
नगराणि हसन्ति निर्भरं ४५५
नगरान्मयि निर्गते यदा ९७६
नगरे नगरे गृहे गृहे ४८७
न घनो घनतां तथा ६८
न च कापि विरोधितावयो १८
न जनः स्वररागवित् २४८
नतयस्तव तावदन्त ५५
न नियन्तुमशक्नुवन् ३८८
निपपात न यत्र ४२४
न पराजयकामना ५२०
न पिपासुरुपैति ४४२
न फलानि यतो न ४२५
न बधान दवीयसि ६१
न बलं मयि निर्बलो ३४४
न मदो मम गर्वं २४
न मनागपि चिन्त्यते ४०६
न ममाविनयस्त्वया ६२४
न मया नगरे ७६
न मया बत तुभ्य ३२३
न यदर्पितवान् न ३९८
नयनद्वयमुत्सतां ५६८
नयने विनिमीलिते ५६५
न यया परितोषितं ६८६
न यशो न मनो ६८७
न मया सविधेऽपि २७७
न रसध्वनयो न ६८१
नवतां समुपैति ६५३
न शृणोति तव १३०
न समानतया ७४
न सरांस्युपगम्य १५०
न सरो न नदीं ९७
न सरोवरतां ३९९

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

न सुखाय विचेष्टितं ३९४
न सुधाम्बुधये ४५२
न हठो न च ८९
न हठो मम मे ६३८
न हसेन्न हसेत् ४१६
नहि कश्चन मां ५०३
नहि कश्चिदयं ५५६
नहि कश्चिदिदं ६३६
नहि किञ्चिदिहास्य ६४०
नहि कोऽपि पिपासु १२८
नहि झङ्कृतयो न ३३
नहि दूर इतस्तव ६६०
नहि भाषितकानि २३५
नहि मां व्यथये: २९४
नहि यत्र पिकध्वनिः ४४०
नहि यावदिदं ६७७
नहि यावदुपैति ६७२
नहि यावदुपैति तत् ३५
नहि वेत्तुमशक्नुवं १०१
नहि वेद न वेत्तु ४३
नहि वोढुमहं क्षमो १७०
नहि सार्थकतामुपे ४८८
निकटत्वमवाप्नुयाः ५१०
निजके शिरसीव ५४१
निजकं किमपि १५९
निजगौरवमात्र २९९
निजचित्तनभो ३९३
निजचेतसि यच्च ३३२
निजभारमहं ३८०
निजयैव सरागया ५१७
निजशर्म विशीर्ण ३४८
निपतिष्यति ते ५६३
निपतेत्तव पाणितः १७५
निममज्ज मयि १५१
नियतिर्यदि मृत्यु ५७९
नियतं परिवर्ति २५७
नियमेन यतो २३६
नियमेषु निबद्धतां ५२४
निरपेक्षतया तया २०

प

पठितं सुबहु श्रुतं ३२५
पतितं तव केश २४०
पतितं न विलोक ३१५
पदचिह्नगवे ५२२
पदचिह्नमहं ९५
पदयोर्ननु तस्य ३८४
परमाणुमिमं १८३
परिकल्प्यत एव २०१
परिचेतुमपि क्षणं ५३६
परिचेष्यसि ये ५३८
परिणाममवैमि ५९४
परिणाममवैमि स ६४२
परितापभरोऽप्य १९२

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

परिवर्तनमेव ६३
परिवार्य य एव २१३
परिहासविजल्प ३८५
पवनाम्बुवदस्मि १३५
पवनो ननु यः समा २२२
पिबतोऽपि पिपा ४५६
पुनरुक्तय एव ६६७
प्रकटस्य पिधान १५
प्रकटीभवतीह २४३
प्रखरैस्तपनस्य ११३
प्रणयप्रतिमां १६
प्रणयाख्यमिदं ३०५
प्रणयाध्वनि सर्व २७४
प्रणयाभिनयस्य १३
प्रणयीति कदाचि २५१
प्रणयेन मिलेत् ५२३
प्रणये हि सति २३७
प्रणयो मम तत्र २२६
प्रणयः क्वचिदेति ६८८
प्रतपंस्तपनो मम १६९
प्रतिकूल इहाभवद् ४०७
प्रतिकूलतया तव २११
प्रतिकूलविधिप्र ५४०
प्रतिभान्ति सुदूर ४६९
प्रथमं न जिघृ १२६
प्रथमं परिवेषणं ५४५
प्रभवत्यरितो भयं १८७
प्रविकासयितुं २५०
प्रविधातुमशक्य ५८६
प्रविश त्वमितो ६५६
प्रविशन्ति मधु २०३
प्रविशेन्निशितं २८७
प्रसमीक्ष्य दृशं ३५३
प्रहरन्ति विनाप ३१७

फ

फलमस्य नु यच्च ४०

ब

बत गर्तंगत ३२९
बत पश्चिमयेव ६६६
बहवो दिवसा नु ३४२
बहवो बत ताड १५२
बहवो मयि सन्ति ३४०
बहवो विहसन्ति ४८३
बहिरत्र महान् २६३
बहु तथ्यमवेक्षितं ६२
बहुधा कथितां ११५
बहुधा रुदितस्य ८८
बहुभिः कविभिर्नि ४४१
बहु वर्षति ते कृपा २४६
बहुविघ्नमभूत् ३९७

भ

भगवानिह भास्करो ५१६
भजते वचनीयतां २५२

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

भजते स्वरागतां २५३
भयमस्ति ममेति ६५६
भणितं मम मौन ३४६
भवतां विदितं हि ३४९
भवति प्रतिकूलतां गते ४५६
भवतीह क आत्त १८६
भवतीह यदेव १६८
भविता कथनेन मे ५५५
भवितास्मि विदां ४३५

म

मदभीप्सितमद्य २८०
मदभीप्सितमस्ति ५४६
मदभीप्सितमेक ४
मदुदीरितमेत ५३३
मधुदानपराय २९२
मधुदानमधीन ३५७
मधुना तव वञ्चितान् १०६
मधु नाम निमित्त ८४
मधुना मिलितेन ९७
मधु निम्नतमाः ६२६
मधु निम्नमतीव ६२५
मधुनीह यदेव १११
मधुनैव कलङ्कितो ४९०
मधुनो ग्रहणेऽथवा ६
मधुनोऽधिगमाय ३५८
मधुनोऽनुपलब्धि १७४
मधुनोपचरेत् ६४४
मधुनः प्रसृते मदे ९०
मधुपात्रमपूरितं १९०
मधुपात्रमिवात्मनो ६५१
मधुपानगृहस्य ८३
मधुपानगृहेऽपि १५३
मधुपानप्रसङ्गतः १८२
मधुपानप्रसङ्गभाषि ११९
मधुपानमिदं न ६५
मधुपानमिदं प्र ६४३
मधुपानमिदं प्रव ४६५
मधुभावनया कया ६६३
मधुभावनयापि ४२९
मधुभावभरेण ७००
मधुभाषितकानि २०२
मधुभृज्ज्वलतीह ३१९
मधुमत्सकलं चरा ६५४
मधु मन्विति यत् ४९७
मधुमन्ति निरीक्षि २१६
मधुरादिह मां ६६५
मधु रे त्वदधीन ६५२
मधुरं पिककुजितं ५७३
मधुरं मधु तस्य ६२७
मनसः किमियं ४३७
मम कश्चन हृद्गतो ५५३
मम काचन वाग् ३०८

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मम काचिदहो ६६२
मम काप्यधिका २८४
मम काममपि कोमलां ६०६
मम चेतसि कश्चि ८०
मम चेतसि कामपी ५२९
मम तावदिदं नि ३
मम तीव्रतरा पि १०
मम तृड्विकलस्य ५१२
मम दीप उपैतु १६४
मम दीपशिखेव २७२
मम दुःखनिवेदनं ३५६
मम दुःखमियं ५७
मम नाम सुखं ३०७
मम नाम्नि गते १२०
मम नाशय पक्षतिं १५५
मम पार्श्वगतस्तथा ५८७
मम भाषितकं ६१८
मम मञ्जय रे १६७
मम मौनमतीव ५०१
मम मौनमिदं द्र १३७
मम मौनमिदं यदा १२१
मम पात्रमपात्र ३५१
मम युद्धमिह प्र ३४३
मम रे मधुपान २४४
मम वागभिलक्ष्य ५०७
मम वाग् रहसीद ६७१
मम वाग्विनिर्वर्तिता २२५
मम वाणि कवित्व ६७४
मम वाद्यजडस्य ४३२
मम विस्मरणीय २९
मम सद्य न हन्त ५०६
मम साधनतां गतं ६३२
मम हन्त प्रतीक्षया ४२६
मयि कः स्वकरेण २००
मयि नाम पराजिते २७५
मयि नाम हसन्ति १६६
मयि यत्नशतैरपि ९६
मयि यावदिदं ६०९
मयि शाप इतीव २५८
मरणं शुभमेक ५०४
मरुरेव मदीय ५९९
मलयानिल चेत्पथा २५
मलयानिल सन्दि २६
मलिनान्यभवन् सुमा २४९
महतापि यमेन ४६१
महतासि परि ५७२
महतां सरसामपे ४७९
मिलते मधुनीह १९६
मिलितेषु सदा पर ५८३
मुखरत्वमिह स्थिता ४६६
मृगये ननु विस्मृतिं १९८
मृदु किञ्चन तस्य २३३
मृदुकेशचयेषु १५८
मृदुता तु तवैव ६५०

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

मृदुना स्तनितेन ३९१
मृदुनूपुरशिञ्जितं ६७०

य

यदकिञ्जनकेऽपि ४०४
यदनुक्तमिहाव ५५४
यदमानि मयाऽभि ४३६
यदयं निहितस्त्वया ३३५
यदि तस्य कथञ्चि ४८१
यदिदं कथितं मया ३८
यदिदं मधु मृण्मये १९५
यदि भूमिकया तया १५४
यदि मौनमलं मम ३०४
यदि मामुदितापि ४७२
यदि वर्षसि वर्ष ४१४
यदुदीर्यं विलज्जितो १४५

र

रचना प्रभवत्यसौ ९७९
रचना मधुनामसङ्गता ६९३
रचितं न च नीड ३०२
रजनी तिमिराव ५९१
रणतः प्रकृतिः पला ५४६
रमयन्ति मनो न ४७३
रसमय्यवधारणा ६८५
रहिते स्वजनैर्द् १०४
रुचये मम नैव ६६४
रुदती रुदती वृथै ३२१
रुदिताद् विरतं वि ३९५
रुदितानि शतं २९४
रुदितान्यवगुण्ठ्य ३७
रुदितैर्भरितेषु १४८
रुदितं मम सम्मुदे ५१
रुदितं हसितं ९२
रुदितं हसितञ्च ६६८

ल

लघुजीव उपा २३८
लघु सार्थकतां नये २७९

व

वचनीयतया तदा ३८६
वचनीयमिदं न ७५
वचनेन मितेन ५८५
वचनैः प्रतिपादि ६८९
वचसा तव नाम ३३०
वसनान्तरिता ५२७
विकलेन तृषाव ५५२
विगता इह तिष्ठ २२९
विगतेषु दिनेषु ६१२
विगलत् किमपीव ३०३
विगलेत्तव पादयोः ४७१
विचराणि कियन् ४२२
विचलेन्न हि यस्तव ५८२
विजयस्य न ते परा २४७
वितते सरसीह ६१

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

विदितं तव वेदि २७१
विदितं न मया ५५१
विधये प्रतिकूलता ४६५
विनिगूढमपि स्व ५०९
विनिवर्तितुमुद्य ४४९
विनिवारित एष ३९२
विनिवारितमप्युपं ४४५
विनिवेदनमेतद ५१४
विनिवेदयसि व्यथां ६४
विनिवेदयिता क ३७९
विनिवेदयितुं न ३७६
विनिवेदयितुं नि ३६३
विनिशम्य सुगीत ५५९
विफलत्वमिदं हि ३६९
विमृशामि तथापि ५६३
विरतेस्तव नाम ४३८
विरतोहमपात्र ३७८
विरतोहमितोपि ४८०
विरतं विनिवेदना ६३१
विरम क्षणमेक ३००
विरमत्यथ नो ५७६
विरमन्ति पिपा ५६४
विरमेयमहं तव १८८
विरहस्य वत ५९२
विरहे तव यापिता २९०
विलिखामि वृहत् ५०८
विवृताननयेव ५३६
विषयक्षुदियं २८९
विहसन्तमवेक्ष्य ४६७
विहसन् विहसन् ३३४
विहितानि न यानि २१०
वृणुते हि तमेव ४८
व्यथते निजया पि ६४७
व्यथितस्य निरा ४४६
व्यथितस्य विकत्थने २७६
व्यथिता भव नैव १७२
व्यथितोऽस्म्यनु ४७१
व्यथितं हृदयस्य ६८२
व्रजतीह न मेनु १६२

श

शनकैः शनकैर्य २
शरणं ननु मौन ४९८
शलभा अयि दी ५८१
शुचिना निजसु १७९
शुभभावनयास्मि ४४८
शृणु किञ्च यथा ५
शृणुयाज्जन आ ४२१
शृणुयात्सदयो ५७८
शृणुयादिह कोपि १९३
श्रुतरूपघनोद्भ ६३९
श्रुतिरस्तु कुराण ३६४
श्रुतिमेति कुतोपि २०८
श्रवणाय तवेय ६९०

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

श्रवणाय यदीह	१९४	समलोकि गतस्य	४९१
श्रवसी तु पिधाय	२२७	समुदीत इतो मम	५३२
श्वसितादपि जी	२२४	समुदेति घना	२८१
		समुदेति तव स्मृतिः	५४३
स		सरलस्य तवास्य	२७८
सकलस्य सदा	३७५	सरलः कुटिलो	६६
सकलादिह मत्त	१८४	सरसि त्वयि यन्नि	६२२
सकलेऽपि सम	४००	सरितो विकलत्व	१०८
समलोकि मया स	२५४	सहजा तु तव स्मित	४९४
सकलं खलु दृश्य	२२३	सहजापि तव स्मितो	५२८
सकलं जगदेव	३१४	सहजैव पिपासुता	३७२
सकलं मधु मह्य	८२	सहजं रुदितेन	६१६
सकलं मम लक्ष्य	४६	सहते जगतीह	३०९
सकलं विरसं भ	६३४	सह संलपनात्त्वया	४५
सकलं सहजत्व	२८३	स हि बिम्बतया	६४६
सततं हृदि वर्धि	३१०	सुकटूनि तिरस्कृता	२१८
सति हन्त निमी	७०	सुकृतस्य कृतस्य	४०२
सफलत्वमियाय	६०१	सुखमित्युदगाद्	३२८
सदपीदमहो नि	६३५	सुखमेकमिहास्ति	२०९
सफलोपि जगज्जये	१७१	सुखमेव मिलेदि	१३९
समजायत किं वु	६२१	सुखिनामिह तन्म	६२८
समतां विषमेषु कि	६४८	सुतरां तव रूपना	५७१
समयः क्व सरित्प्रवा	४१२	सुतरां त्वदधीन	३८३
समयः स्वरताल	५१९	सुतरां भवसीह	१५७
समयस्त्वरया	६४५	सुधया समकक्ष	१२४
समयस्य गतिं हि	५०५	सुबहूनि ममेह	६२३
समये प्रतिकूलतां	३६८	सुबहोः समयाद	२३८

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

सुरभिः सततं १२७
सुरभिस्तव रे ११६
सुरभेर्विगतस्य ३३९
सुविशालतरे ३७०
सुहृदस्तव निर्गं ३१८
सुहृदामभिका ४३०
सुहृदो निजवक्त्र ३१
सुहृदं प्रति तं २२
सुहृदः शृणुता ३०५
स्खलिता हि पदे २६१
स्थितिमेवमिमां २३१
स्थिरतां जगतो ५४
स्फुटमेव निवे ५४७
स्फुरिते शशिम ५५७
स्मयमानमुखा ३२२
स्मरणं मधु तस्य ३१२
स्मितमात्रमपि १४९
स्मितमेव तदीय ७३
स्मृत एव ममो १६०
स्वन मा पिक ते ४३३
स्वपराङ्मुखता २६७
स्वपिपासुतयेह २६३
स्वमितो विनिवेद ५१६
स्वयमावृणु वा ४७७
स्वयमेव पथि ३५९
स्वरसाधनया ५५०

ह

हसितस्य मम ४२८
हसितानि जना ४८६
हसितान्युपलक्ष्य ५८४
हसितेन तु यस्य ५८०
हसितैरिव निर्मं ५४८
हसितं क्वचिदत्र ८१
हसितं तव भाषितं ५२
हसितं मम जान ५९०
हसितं रुदितत्व १०७
हसितं रुदितं ममा ३५०
हसितं विकसत्सु १०३
हृदयस्य तवानु २९६
हृदयस्य विदीर्णतां ५१३
हृदये कुरुते दवी २९८
हृदयेनुभवाम्यहं २३४
हृदये मम कापि १००
हृदयं झटिति २१५
हृदयं मम चित्र ३५५
हृदयं मम काच ९
हृदि जागरिता २६६
हृदि पूर्वमियं ४४४
हृदि भारति कच्छपीं १

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

शुद्धिपत्रम्

अशुद्धम्	शुद्धम्	पद्य सं०
शतध	शतधा	९
··र्णमा	चूर्णमा	९
क्षुघिता	क्षुधिता	३२
स्तीव्रत	स्तीव्रत	३५
तता।पि	ततोऽपि	४९
पिपसुता	पिपासुता	५७
महति	मर्हति	६१
तामम्	ताममू	६३
यदेप	यद्देष	६८
वहिगंते	वहिर्गते	७६
अयि	अपि	१०२
निजयक।कि	निजयैकाकि	११७
नैव	नैव रे	११९
कऽपि	कोऽपि	१३१
विकसत्य	विकसन्त्य	१८०
तद्न्तर	तदनन्तर	२६६
किञ्जनेषु	किञ्चनेषु	३६०
जना	जनो	३८३
भग्य	भाग्य	३८४

-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Acade

अशुद्धम्	शुद्धम्	पद्य सं०
लभ	लभते	३९९
जगर्ति	जागर्ति	४००
स्त्वमभू	त्वमभू	४२३
क्व नु	क्व न	४८७
कथनेन मे	कथनेन ते	५५५
वचनै	वचनैः	५६९
मधु मदुगीत	मधुमदुगीत	५६९
दिवधुना	दिवाधुना	५७४
अतिमत्र	अतिमात्र	६४९
मिवत्मनो	मिवात्मनो	६५१
मागगा	मार्गगा	६६९

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

CC-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academy

C-0. Ganga Nath Jha Campus. Central Sanskrit Uni. Digitized by Sri Muthulakshmi Research Academ